श्रीगणेशायनमः ॥ हरिः ॐ इषेत्वोर्जेत्वावायवस्थोपायवस्थदेवोवः
सविताप्रार्पयतुश्रेष्ठतमायकर्मणआप्यायध्वमघ्नियादेवभागमूर्जस्वतीः
पयस्वतीःप्रजावतीरनमीवाअयक्ष्मामावस्तेनईशतमाघशꣳसोरुद्रस्यहे
तिःपरिवोवृणक्तुध्रुवाअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पाहि
॥ १ ॥ यज्ञस्यघोषदसिप्रत्युष्टꣳरक्षःप्रत्युष्टाअरातयःप्रेयमगाद्विषणा
बर्हिरच्छमनुनाकृतास्वधयावितष्टातआवहंतिकवयःपुरस्ताद्देवेभ्योजु
ष्टमिहबर्हिरासदेदेवानांपरिषूतमसिवर्षवृद्धमसिदेववर्हिर्मात्वान्वङ्गा
तिर्यक्पर्वतेराध्यासमाच्छेत्तातेमारिषंदेववर्हिःशतवल्शंविरोहसहस्रव
ल्शाविवयꣳरुहेमपृथिव्याःसंपृचःपाहिसुसंभृतांत्वासंभराम्यदित्यैरा
स्नासींद्राण्यैसंनहनंपूषातेग्रंथिंग्रथ्नातुसतेमास्थादिंद्रस्यत्वाबाहुभ्यासुध
च्छेबृहस्पतेमूर्ध्नाहिराम्युर्वंतरिक्षमन्विहिदेवंगममंसि ॥ २ ॥ शुंधध्वंदै

बहूनामसद्वशी ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूढमस्यपा꣡ꣳ
सुरइरावतीधेनुमतीहिभूत꣡ꣳसूयवसिनीमनवेयशस्ये ॥ व्यस्कभ्नाद्रोद꣡
सीविष्णुरेतेदाधारपृथिवीमभितोमयूखैः ॥ प्राचीप्रेतमध्वरंकल्पयंती
ऊर्ध्वयज्ञंनयतंमाजीह्वरत्मत्रमेथांवर्ष्मन्पृथिव्यादिवोवाविष्णवुतवा
पृथिव्यामहोवाविष्णवुतवांतरिक्षाद्वस्तौपृणस्वबहुभिर्वसव्यैराप्रयच्छ
दक्षिणादोतसव्यात् ॥ विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेर
जा꣡ꣳसियोअस्कभायदुत्तर꣡ꣳसधस्थंविचक्रमाणस्त्रेधोरुगायोविष्णोरराट
मसिविष्णोःपृष्ठमसिविष्णोःश्नप्त्रेस्थोविष्णोस्यूरसिविष्णोर्ध्रुवमसिवै
ष्णवमसिविष्णवेत्वा ॥ ५ ॥ रक्षोहणोवलगहनोवैष्णवान्खनामीदम
हंतंवलगमुद्वपामियन्नःसमानोयमसमानोनिचखानेदमेनमधरंकरोमि
योनःसमानोयोसमानोरातीयतिंगायत्रेणछंदसावबाढोवलगःकिमत्रभद्रं

तन्नौस॒हवि॒राड॑सिसपत्न॒हास॑म्रा॒ड॑सिभ्रातृव्य॒हास्व॒राड॑स्यभिमाति॒हावि
श्वा॒राड॑सि॒विश्वा॑सांन्नाष्ट्रा॒णा ऽ हंतारक्षो॒हणो॑वलग॒हन॒ः प्रोक्षा॑मिवैष्ण॒वान्
र॒क्षो॒हणो॑वलग॒हनो॑वनया॒मिवैष्ण॒वान॒यवो॑सिय॒वया॒स्मद्वे॒षो॑य॒वया॑रा॒ती
र॒क्षो॒हणो॑वलग॒हनो॑वस्तृणा॒मिवैष्ण॒वान्र॑क्षो॒हणो॑वलग॒हनो॒भिजु॑होमिवै
ष्ण॒वान्र॑क्षो॒हणौ॑वलग॒हना॒वुप॑दधामिवैष्ण॒वीर॑क्षो॒हणौ॑वलग॒हनौ॒पर्यू॒हा
मिवैष्ण॒वीर॑क्षो॒हणौ॑वलग॒हनौ॒परि॑स्तृणा॒मिवैष्ण॒वीर॑क्षो॒हणौ॑वलग॒हनौ॒वै
ष्ण॒वीबृ॑हन्नसिबृह॒द्भ्रा॑वाबृह॒तीमि॑न्द्रा॒य॒वाचं॑वद ॥ ६ ॥ वि॒भूर॑सि॒प्रवा॑हण॒ोव
ह्नि॑रसिहव्य॒वाह॑न॒ः श्या॒त्रो॑सि॒प्रचे॑तास्तु॒थो॑सि॒वि॒श्ववे॑दाउ॒शिग॑सि॒कवि॑रंघा
रि॑रसि॒बंभा॑रि॒रव॑स्यु॒र॑सि॒दुव॑स्वान्ल॒ुंध्यू॒र॑सिमार्जा॒लीय॒ः स॒म्राड॑सिकृ॒शानु॒ः
परि॑षद्यो॑सि॒पव॑मान॒ः प्र॒तक्वा॑सि॒नभ॑स्वान॒सं॑मृष्टो॑सिहव्य॒सूद॑ऋ॒तधा॑मासि
सुव॑र्ज्यो॒ति॒र्ब्रह्म॑ज्योतिर॒सि॒सुव॑र्धा॒मा॒जो॑स्येक॒पा॒दहि॑र॒सि॒बु॒ध्नि॒यो॑रौद्रे॒णानी

दशस्थाप्सुषदोमहिनैकादशस्थतेदेवायज्ञमिमंजुषध्वं ॥ ओमासश्चर्षणी
धृतोविश्वेदेवासआगत ॥ दाश्वाँसोदाशुषःसुतं ॥ भूमिर्भूम्नाद्यौर्वरि
णांतरिक्षंमहित्वा ॥ उपस्थेतेदेव्यदितेत्रिधातवेग्निंमन्नादमन्नाद्यायादधे ॥ आयं
गौःपृश्निरक्रमीदसनन्मातरंपुनः ॥ पितरंचप्रयन्सुवः ॥ त्रिँशद्धाम
विराजतिवाक्पतंगायशिश्रिये ॥ प्रत्यस्यवह्द्युभिः ॥ अस्यप्राणादपा
नत्यंतश्चरतिरोचना ॥ व्यख्यन्महिषःसुवः ॥ सप्ततेअग्नेसमिधःसप्त
जिह्वाःसप्तर्षयःसप्तधामप्रियाणि ॥ सप्तहोत्राःसप्तधात्वायजंतिसप्त
योनीरापृणस्वाघृतेन ॥ पुनरूर्जानिवर्तस्वपुनरग्नइषायुषा ॥ पुनर्नःपा
हिविश्वतः ॥ सहरय्यानिवर्तस्वाग्नेपिन्वस्वधारया ॥ विश्वप्स्न्याविश्वत
स्परि ॥ चित्रावसोस्वस्तितेपारमशीय ॥ १० ॥ ममनामप्रथमंजातवेदःपि
तासाताचदधतुर्यदग्रे ॥ तत्वंबिभृहिपुनरामदैतोस्तवाहंनामबिभराण्यग्ने ॥

ममनामतवचजातवेदोवाससीइवविवसानौयेचरावः ॥ आयुषेत्वंजीव
सेवयंयथायथंविपरिदधावहैपुनस्ते ॥ नमोग्नयेप्रतिविद्धायनमोनाधृ
ष्टायनमःसम्राजे ॥ अषाढोअग्निर्बृहद्भयाविश्वजित्सहैत्यश्रेष्ठोगंधर्वः ॥
त्वत्पितारोअग्नेदेवास्त्वामाहुतयस्त्वद्विवाचनाः ॥ संमामायुषासंगौप
त्येनसुहितेमाधाः ॥ अयमग्निःश्रेष्ठतमोयंभगवत्तमोयꣳसहस्रसातमः ॥
अस्माअस्तुसुवीर्यं ॥ मनोज्योतिर्जुषतामाज्यंविच्छिन्नंयज्ञꣳसमिमंदधा
तु ॥ याइष्टाउषसोनिमृचश्चताःसंदधामिहविषावृतेन ॥ पयस्वतीरोष
धयःपयस्वद्वीरुधांपयः ॥ अपांपयसोयत्पयस्तेनमामिंद्रसꣳसृज ॥
अग्नेव्रतपतेव्रतंचरिष्यामितच्छकेयंतन्मेराध्यतां ॥ अग्निꣳहोतारमिह
तꣳहुवेदेवान्यज्ञियान्हियान्हवामहे ॥ आयंतुदेवाःसुमनस्यमानावि
यंतुदेवाहविषोमेअस्य ॥ कस्त्वायुनक्तिसत्वायुनक्तुयानिघर्मेकपालान्यु

पितॄन्त्सुविदत्राँ२अपीतयमेनयेसधमादंमदन्ति ॥ मनोन्वाहुवामहेना
राशँ२सेनस्तोमेनापितॄणांचमन्मभिः ॥ आनएतुमनःपुनःक्त्वेदक्षाय
जीवसे ॥ ज्योक्चसूर्यंदृशे ॥ पुनर्नःपितरोमनोददातुदैव्योजनः ॥
जीवंव्रातँसचेमहि ॥ यदन्तरिक्षंपृथिवीमुतद्यांयन्मातरंपितरंवाजिहिँ२
सिम ॥ अग्निर्मातस्मादेनसोगार्हपत्यःप्रमुंचतुदुरितायानिचकृमकरोतु
मामनेनसं ॥ १३ ॥ यथासति ॥ सुगंसेषायमेष्यांअवांबरुद्रमदिमह्य
वंदेवंत्र्यंबकं ॥ यथानःश्रेयसःकरद्यथानोवस्यसःकरद्यथानःपशुमतः
करद्यथानोव्यवसाययात् ॥ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारु
कमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ एषतेरुद्रभागस्तंजुषस्वतेनावसे
नपरोमूजवतोतीह्यवततधन्वापिनाकहस्तःकृत्तिवासाः ॥ प्रणोदेवीसरँ
स्वतीवाजेभिर्वाजिनीवती ॥ धीनामवित्र्यवतु ॥ आनोदिवोबृहतःपर्व

तादासरस्वतीयजतागौतुयज्ञं ॥ हवैदेवीर्जुजुषाणाघृताचीशग्मांनोवाचं
मुशतीश्शृणोतु ॥ बृहस्पतेजुषस्वनोहव्यानिविश्वदेव्य ॥ रास्वरत्नानि
दाशुषे ॥ एवापित्रेविश्वदेवायवृष्णेयज्ञैर्विधेमनमसाहविर्भिः॥ बृहस्पते
सुप्रजावीरवैतोवय९स्यामपतयोरयीणां॥१४॥इतिप्रथमाष्टकःसमाप्तः॥
भवतिसाहस्रीवाएषालक्ष्मीयदुन्नतोलक्ष्मियैवपशूनवरुधेयदासहस्रैपशू
न्प्राप्नुयादथवैष्णवंवामनमालभेतैतस्मिन्वैतत्सहस्रमध्यंतिष्ठत्तस्माद्वेषवा
मनःसमीषितःपशुभ्यएवप्रजातिभ्यःप्रतिष्ठांदधातिकोर्हतिसहस्रैपशून्
प्राप्तुमित्याहुरहोरात्राण्येवसहस्र९संपाद्यालभेतपशवः ॥ त्यांनुक्षत्रि
या९अवआदित्यान्यांचिषामहे ॥ सुमृडीका९अभिष्टये ॥ वायोशत९
हरीणांयुवस्वपोष्यांणां ॥ उतवातेसहस्रिणोरथआयातुपाजसा ॥ सइ
ज्ञेनेनसविशासजन्मनासपुत्रैर्वाजैभरतेधनानृभिः ॥ देवानांयःपितरमा

विवासतिश्रद्धामनाहविषाब्रह्मणस्पतिं ॥ ससुष्टुभासऋक्तागणेनवलꣳ
रुरोजफलिगꣳरवेण ॥ बृहस्पतिरुस्रियाहव्यसूदःकनिक्रदद्वावशती
रुदाजत् ॥ १ ॥ मारुतमसिमरुतामोजोपांधारांभिंधिरमयंतमरुतःश्ये
नमायिनंमनोजवसंवृषणꣳसुवृक्तिं ॥ येनशर्धउग्रमवसृष्टमेतितदश्वि
नापरिधत्तꣳस्वस्ति ॥ पुरोवातोवर्षंजिन्वरावृत्स्वाहावाताववर्षन्नुग्रावृ
त्स्वाहास्तनयन्वर्षन्भीमरावृत्स्वाहानशन्यंवस्फूर्जंदिद्युद्वर्षंत्वेषरावृत्स्वा
हातिरात्रंवर्षन्पूर्तिरावृत्स्वाहावहुहायमंवृषादितिश्रुतरावृत्स्वाहातपतिव
र्षन्विराडावृत्स्वाहावस्फूर्जंदिद्युद्वर्षन्भूतरावृत्स्वाहामांदावाशाःशुंध्यूरजि
राः ॥ ज्योतिष्मतीस्तमस्वरीरुंदतीःसुफेनाः ॥ मित्रंभृतःक्षत्रंभृतःसुरा
ष्ट्राइहमावत ॥ वृष्णोअश्वस्यसंदानमसिवृष्ण्यैत्वोपनह्यामि ॥ २ ॥ दे
वावसव्याअग्नेसोमसूर्य ॥ देवाःशर्मण्यामित्रावरुणार्यमन् ॥ देवाः

सपीतयोपांनपादाशुहेमन् ॥ उद्भोदत्तोदधिंभैतदिवःपर्जन्यादंतरिक्षा
त्पृथिव्यास्ततोंनोवृष्ट्यावत ॥ दिवांचित्तमंःकृण्वंतिपर्जन्येनोदवाहेन ॥
पृथिवींयद्युंदंति ॥ आयंनरंःसुदानवोददाशुषेदिवःकोशमचुच्यवुः ॥
विपर्जन्यांःसृजंतिरोदसीअनुधन्वनायंतिवृष्टयः ॥ उदीरयथामरुतःस
मुद्रतोयूयंवृष्टिंवर्षयथापुरीषिणः ॥ नवोदसाउपदस्यंतिधेनवःशुभंया
तामनुरथांअवृत्सत ॥ सृजावृष्टिंदिवआद्भिःसमुद्रंपृण ॥ अव्जाअसिप्र
थमजावलंमसिसमुद्रियं ॥ उन्नैभयपृथिवींभिंधीदंदिव्यंनभः ॥ उद्भोदि
व्यस्यनोदेहीशानोविसृजादतिं ॥ येदेवादिविभागायैतरिक्षभागायेपृथि
विभागाः ॥ तइमंयज्ञमवंतुतइदंक्षेत्रमाविशंतुतइदंक्षेत्रमनुविविशंतु
॥ ३ ॥ मारुतमसिमरुतामोजइतिकृष्णंवासःकृष्णतूषंपरिधत्तएतद्वैवृ
ष्ट्यैरूपंसरूपएवभूत्वापर्जन्यंवर्षयतिरमयंतमरुतःश्येनमायिनमितिप

श्राह्रातंप्रतिमीवतिपुरोवातमेवजनयतिवर्षस्यावरुध्यैवातनामानिजुहो
तिवायुर्वैवृष्ट्याईशेवायुमेवस्वेनभागधेयेनोपधावतिसएवास्मैपर्जन्यंवर्ष
यत्यष्टौजुहोतिचतस्रोवैदिशश्चतस्रोवांतरदिशादिग्भ्यएववृष्टिꣳसंग्र
च्यावयतिकृष्णाजिनेसंयौतिहविरेवाकरंतर्वेदिसंयौत्यवरुध्यैयतीनामध्य
मानानाꣳशीर्षाणिपरापतंतेखर्जूराअभवंतेषाꣳरसऊर्ध्वौपतत्तानिकरी
राण्यभवन्त्सौम्यानिवैकरीराणिसौम्याखलुवाआहुतिर्दिवोवृष्टिंच्यावय
तियत्करीराणिभवंतिसौम्ययैवाहुत्यादिवोवृष्टिमवरुंधेमधुषासंयौत्यपां
वाएषओषधीनाꣳरसोयन्मध्वश्यएवौषधीभ्योवर्षत्यथोअश्यएवौषधी
भ्योवृष्टिंनिनयतिमांदावाशाइतिसंयौतिनामधेयैरेवैनाअच्छैत्यथोयथाब्रू
यादसावेहीत्येवमेवैनानामधेयैराच्यावयतिवृष्णोअश्वस्यसंदानमसिवृ
ष्ट्यैत्वोपनह्यामीत्याहवृषावाअश्वोवृषापर्जन्यःकृष्णइवखलुवैभूत्वावर्ष

तिरूपेणैवैन ँ समर्धयतिवर्षस्यावरुध्यै ॥ ४ ॥ देवावसव्यादेवाः शर्मण्या
देवाः सपीतयइत्याबध्नातिदेवताभिरेवान्वहंवृष्टिमिच्छतियदिवर्षेत्तावत्ये
वहोतव्यैयदिनवर्षेच्छ्लोभूतेहविर्निर्वपेदहोरात्रैवैमित्रावरुणावहोरात्राभ्यां
खलुवैपर्जन्योवर्षतिनक्तँवाहि दिवावावर्षतिमित्रावरुणावेवस्वेनभागधे
येनोपधावतितावेवास्माअहोरात्राभ्यांपर्जन्यँवर्षयतोऽग्नयेधामच्छदैपुरो
डाशमष्टाकपालंनिर्वपेन्मारुत ँ सप्तकपाल ँ सौर्यमेकंकपालमग्निर्वाइ
तोवृष्टिमुदीरयतिमरुतःसृष्टानेयंतियदाखलुवाअसावादित्योन्यङ्रश्मि
भिःपर्यावर्ततेथंवर्षतिधामच्छदिवखलुवैभूत्वावर्षत्येतावैदेवतावृष्ट्यांई
शतेताएवस्वेनभागधेयेनोपधावतिताएवास्मैपर्जन्यँवर्षयंत्युतावर्षिष्यन्
वर्षत्येवसृजावृष्टिंदिवआद्भिःसमुद्रंपृणेत्याहेमाश्चैवामूश्चापःसमर्धयत्य
थोआभिरेवामूरच्छैत्यजाअसिप्रथमजाबलमसिसमुद्रियमित्याहयथाय

जुरेवैतदुन्नंभयपृथिवीमितिवर्षाकांजुहोत्येषावाओषधीनांवृष्टिवनिस्त
यैववृष्टिमाच्यावयतियेदेवादिविभागाइतिकृष्णाजिनमवधूनोतीमएवा
सैलोकाःप्रीताअभीष्टाभवंति ॥ ५ ॥ उशंतस्त्वाहवामहउशंतःसमिधी
महि ॥ उशन्नुशतआवहपितॄन्हविषेअत्तवे ॥ त्वꣳसोमप्रचिकितोम
नीषात्वꣳराजिष्ठमनुनेषिपंथां ॥ तवप्रणीतीपितरोनइंदोदेवेषुरत्नमभजं
तधीराः ॥ त्वयाहिनःपितरःसोमपूर्वेकर्माणिचक्रुःपवमानधीराः ॥ वन्व
न्नवातःपरिधीꣳरपोर्णुवीरेभिरश्वैर्मघवाभवानः ॥ त्वꣳसोमपित्रभिःसं
विदानोनुद्यावापृथिवीआततंथ ॥ तस्मैतइंदोहविषाविधेमवयꣳस्याम
पतयोरयीणां ॥ अग्निष्वात्ताःपितरएहगच्छतसदःसदःसदतसुप्रणीत
यः ॥ अत्ताहवीꣳषिप्रयतानिबर्हिष्यथारयिꣳसर्ववीरंदधातन ॥ बर्हि
षदःपितरऊत्यर्वागिमावोहव्याचकृमाजुषध्वं ॥ तआगतावसाशंतमेना

थास्मभ्यꣳशंयोरꣳरपोदधात ॥ आहंपितॄन्त्सुविदत्राꣳअवित्सिनपातंच
विक्रमणंचविष्णोः ॥ बर्हिषदोयेस्वधयासुतस्यभजंतपित्वस्तइहागमिष्ठाः ॥ उपहूताःपितरःसोम्यासोबर्हिष्येषुनिधिषुप्रियेषु ॥ तआगमंतु
तइहश्रुवंत्वधिब्रुवंतुतेअवंत्वस्मान् ॥ उदीरतामवरउत्परासउन्मध्यमाः
पितरःसोम्यासः ॥ असुंयईयुरवृकाऋतज्ञास्तेनोवंतुपितरोहवेषु ॥ इदं
पितृभ्योनमोअस्त्वद्यपूर्वासोयउपरासईयुः ॥ येपार्थिवेरजस्यानिषत्ता
येवानूनꣳसुवृजनासुविक्षु ॥ अधायथानःपितरःपरासःप्रवासोअग्नक्
तमाशुषाणाः ॥ शुचीदयंदीधितिमुक्थशासःक्षामाभिंदंतोअरुणीरपव्रन् ॥ यदग्नेकव्यवाहनपितॄन्यक्ष्यतावृधः ॥ प्रचहव्यानिवक्ष्यसिदेवेभ्यश्चपितृभ्यआ ॥ त्वमग्नईडितोजातवेदोवाड्वहव्यानिसुरभीणिकृत्वा ॥
प्रादाःपितृभ्यःस्वधयातेअक्षन्नद्धित्वंदेवप्रयाताहवीꣳषि ॥ मातलीक्र

व्यैर्यमोऽंगिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ॥ याꣳश्चदेवावावृधुर्यैश्च देवान्त्स्वाहान्येस्वधयान्येमदंति ॥ इमंयमप्रस्तरमाहिसीदांगिरोभिः पितृभिःसंविदानः ॥ आत्वामंत्राःकविशस्तावहंत्वेनाराजन्हविषामाद यस्व ॥ अंगिरोभिरागहियज्ञियेभिर्यमवैरूपैरिहमादयस्व ॥ विवस्वंतꣳ हुवेयःपितातेस्मिन्यज्ञेबर्हिष्यानिषद्य ॥ अंगिरसोनःपितरोनवग्वाअथर्वाणोभृगवःसोम्यासः ॥ तेषांवयꣳसुमतौयज्ञियानामपिभद्रेसौमनसे स्याम ॥ ६ ॥ इतिद्वितीयाष्टकःसमाप्तः ॥

यस्तेद्रप्सस्कंदतियस्तेअꣳशुर्बाहुच्युतोधिषणायोरुपस्थात् ॥ अध्वर्योर्वा परियस्तेपवित्रात्स्वाहाकृतमिंद्रायतंजुहोमि ॥ शिवस्त्वष्टरिहागहिविभुः पोषउतत्मनां ॥ यज्ञेयज्ञेनउदव ॥ भक्षेहिमाविशदीर्घायुत्वायशंतनुत्वा यरायस्पोषायवर्चसेसुप्रजास्त्वायेहिवसोपुरोवसोप्रियोमेहृदोस्यश्विनो

संहिता.

॥ १० ॥

स्त्वाबाहुभ्याꣳसध्यासंनृचक्षसंत्वादेवसोमसुचक्षाअवरुन्येषंमंद्राभिभूः
तिःकेतुर्यज्ञानांवाग्जुषाणासोमस्यतृप्यतुमंद्रास्वर्वाच्यदितिरनाहतशी
र्ष्णीवाक्जुषाणासोमस्यतृप्यत्वेहिविश्वचर्षणेशंभूर्मयोभूस्वस्तिमाहरि
वर्णप्रचेरऋत्वेदक्षायरायस्पोषायसुवीरतायैमामाराजन्विबीभिषोमासे
हार्दिंत्विषावधीः ॥ वृषणेशुष्मायायुषेवर्चसे ॥ वसुमद्गणस्यसोमदेव
तेमतिविदःप्रातःसवनस्यगायत्रछँदसइंद्रपीतस्यनराशꣳसपीतस्यपितृ
पीतस्यमधुमतउपहूतस्योपहूतोभक्षयामिरुद्रवद्गणस्यसोमदेवतेमतिवि
दोमाध्यँदिनस्यसवनस्यत्रिष्टुप्छँदसइंद्रपीतस्यनराशꣳसपीतस्यपितृपी
तस्यमधुमतउपहूतस्योपहूतोभक्षयाम्यादित्यवद्गणस्यसोमदेवतेमतिवि
दस्तृतीयस्यसवनस्यजगतीछंदसइंद्रपीतस्यनराशꣳसपीतस्यपितृपीत
स्यमधुमतउपहूतस्योपहूतोभक्षयामि ॥ आप्यायस्वसमेतुतेविश्वतःसोम

वृष्णियं ॥ भवावाजस्यसंगथे ॥ हिन्वमेगात्राहरिवोगृणान्मेमावितीं
तृषः ॥ शिवोमेसप्तर्षीनुपतिष्ठस्वमामेवाङ्नाभिमतिंगाः ॥ अपामसो
ममृतांअभूमादर्शर्मज्योतिरविदामदेवान् ॥ किमस्मान्कृणवदरातिःकि
सुधूर्तिरमृतमर्त्यस्य ॥ यन्मआत्मनोमिंदाभूदग्निस्तत्पुनराहार्जातवेदावि
चर्षणिः ॥ पुनरग्निश्चक्षुरदात्पुनरिंद्रोबृहस्पतिः ॥ पुनर्मेअश्विनायुवंच
क्षुराधत्तमक्ष्योः ॥ इष्टयजुषस्तेदेवसोमस्तुतस्तोमस्यशस्तोक्थस्यहारिंव
तइंद्रपीतस्यमधुमतउपहूतस्योपहूतोभक्षयामि ॥ आपूर्यास्थामापूरयत
प्रजयाचधनेनच॥एतत्तेतत्पितरोयत्वामन्वेतत्तेपितामहप्रपितामहयेचत्वा
मन्वत्रपितरोयथाभागंमंदध्वंनमोवःपितरोरसायनमोवःपितरःशुष्मा
यनमोवःपितरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोमन्यवेनमो
वःपितरोघोरायपितरोनमोवोयएतस्मिन्लोकेस्थयुष्मा॰स्तेनुयेस्मिन्लो

केमांतेनुयएतस्मिन्लोकेस्थयूयंतेषांवसिष्ठाभूयास्तयेस्मिन्लोकेहंतेषांव
सिष्ठोभूयासंप्रजांपतेनत्वदेतान्यन्योविश्वाजातानिपरितावंभूव ॥ यत्का
मास्तेजुहुमस्तन्नोअस्तुवयꣳस्यामपतयोरयीणां ॥ देवकृतस्यैनसोवयजं
नमसिमनुष्यकृतस्यैनसोवयजंनमसिपितृकृतस्यैनसोवयजंनमस्यप्सुधौ
तस्यसोमदेवतेनृभिःसुतस्येष्टयंजुषस्तुतस्तोमस्यशस्तोक्थस्ययोभक्षोअं
श्वसनिर्योगोसनिस्तस्यतेपितृभिर्भक्षंकृतस्योपहूतस्योपहूतोभक्षयामि
॥१॥ महीनांपयोसिविश्वेषांदेवानांतनूर्ऋध्यासमद्यपृषतीनांग्रहंपृषतीनां
ग्रहोसिविष्णोर्हृदयमस्येकमिषविष्णुस्त्वानुविचक्रमेभूतिर्दध्याघृतेनव
र्धतांतस्यमेष्टस्यवीतस्यद्रविणमागम्याज्योतिरसिवैश्वानरंपृश्निंयैदुग्धं ॥
नयेदेभ्योवृश्च्येतयद्वैश्वकर्मणानिजुहोतिसदस्यानेवतत्प्रीणात्यस्मेदेवासो
वपुषेचिकत्सतयमाशिरादंपतीवामꣳश्रुतः ॥ पुमान्पुत्रोजायतेविंदतेव

स्वथाविश्वेअरपाएधतेगृहः ॥ आशीर्दायादंपतीवाममंश्रुतामरिष्टोरायः
सचताऽसमोकसा ॥ यआसिंचत्संदुग्धंकुंभ्यासहेष्टेनयामन्नमंतिंजहा
तुसः ॥ सर्पिर्ग्रीवीपीवर्यस्यजायापीवानःपुत्राअकृशासोअस्य ॥ सहजां
निर्यःसुमखस्यमानइंद्रायाशिरंसहकुंभ्यादात् ॥ आशीर्मऊर्जमुतसुप्र
जास्त्वमिषंदधातुद्रविणंसर्वर्चसं ॥ संजयन्क्षेत्राणिसहसाहमिंद्रकृण्वा
नोअन्याऽअधरान्सपत्नान् ॥ २ ॥ भवयजमानायशंयोः ॥ अग्निस्त्री
णित्रिधातून्याक्षैतिविदथाकविः ॥ सत्रीरेकादशाइह ॥ यक्षच्चापि
प्रयच्चनोविप्रोदुतःपरिष्कृतः ॥ नभंतामन्यकेसमे ॥ इंद्राविष्णूहिहि
ताःशंबरस्यनवपुरोनवतिंचश्नथिष्टं ॥ शतंवर्चिनःसहस्रंचसाकंहथो
अप्रत्यसुरस्यवीरान् ॥ उतसातामहिषमन्ववेनदमीत्वाजहतिपुत्रदेवाः ॥
अथाब्रवीद्वृत्रामिंद्रोहनिष्यन्त्सखेविष्णोवितरंविक्रमस्व ॥ ३ ॥ अग्नेते

॥ १२ ॥

जस्विनंतेजस्वीत्वंदेवेषुभूयास्तेजस्वंतंमामायुष्मंतंवर्चस्वंतंमनुष्येषुकुरु
दीक्षायैचत्वातपसश्चतेजसेजुहोमितेजोविदंसितेजोमामाहासीन्माहंते
जोहासिषंमामांतेजोहासीदिंद्रौजस्विन्नोजस्वीत्वंदेवेषुभूयाओजस्वंतंमा
मायुष्मंतंवर्चस्वंतंमनुष्येषुकुरुब्रह्मणश्चत्वाक्षत्रस्यचौजसेजुहोम्योजोवि
द्स्योजोमामाहासीन्माहमोजोहासिषंमामामोजोहासीत्सूर्यभ्राजस्विन्
भ्राजस्वीत्वंदेवेषुभूयाभ्राजस्वंतंमामायुष्मंतंवर्चस्वंतंमनुष्येषुकुरुवायो
श्चत्वापांचभ्राजसेजुहोमिसुवर्विदंसिसुवर्मामाहासीन्माह ९सुवर्हासिषं
मामा ९सुवर्हासीन्मयिमेधांमयिप्रजांमय्यग्निस्तेजोदधातुमयिमेधांमयि
प्रजांमयींद्रइंद्रियंदधातुमयिमेधांमयिप्रजांमयिसूर्योभ्राजोदधातु ॥ ४ ॥
इंद्राग्नीमेवर्चःकृणुतांवर्चःसोमोबृहस्पतिः ॥ वर्चोमेविश्वेदेवावर्चोमेधत्त
मश्विना ॥ एतंयुवानंपरिवोददामितेनक्रीडंतीश्चरतप्रियेण ॥ मानः

शास्त॒जनु॒षा॒सुभागा॒रायस्पोषे॑ण॒समि॒षामदेम ॥ नमो॑महि॒म्नउ॒तच॒क्षु॑षे॒ते
मरु॑तांपि॒त॒स्तद्व॒हंगृ॑णामि ॥ अनु॑मन्यस्व॒सु॒यजा॑यजाम॒जुष्टं॑दे॒वाना॑मि॒दम॑
स्तु॒हव्यं॑ ॥ दे॒वाना॑मे॒षउ॑प॒नाहआ॑सीद्पांग॒र्भ॑ओष॒धीषु॒न्यक्तः ॥ सोम॑स्यद्र
प्स॑मवृणीतपू॒षाबृ॒हन्नद्रि॑रभव॒त्तदे॑षां ॥ पि॒ता॒व॒त्सा॒नां॑पति॑रद्रि॒या॒नामथो
पि॒ता॑म॒ह॒तांगर्ग॑राणां ॥ व॒त्सोज॒रायु॑क्प्रति॒धृक्पी॒यू॒ष॒आमि॑क्षा॒मस्तु॑घृतम॑
स्य॒रेतः ॥ त्वांगावौवृणतरा॒ज्या॒य॒त्वा॑ऽहवंतम॒रु॒तः॒स्व॒र्काः ॥ वर्ष्मन्क्ष॒त्रस्य॑
क॒कुभि॑शिश्रिया॒णस्ततो॑नउ॒ग्रोवि॑भ॒जा॒व॒सू॒नि ॥ व्यृ॑ध्ये॒न॒वाए॒ष॒प॒शुना॑य
ज॒ते॒यस्यै॒ता॒नि॒न॒क्रि॒यं॒त॒ए॒ष॒ह॒त्वैस॑मृ॒द्धेन॒यज॒ते॒यस्यै॒ता॒नि॒क्रि॒यं॒ते ॥ ५ ॥
म॒हीद्यौः॑पृ॒थि॒वी॒च॑न॒इ॒मं॒य॒ज्ञं॑मि॑मिक्षतां ॥ पि॒पृ॒ता॒न्नो॒भरी॑मभिः ॥ धा॒ता
ददा॑तुनो॒र॒यि॒मीशा॑नो॒ज॒ग॒त॒स्पति॑ः ॥ स॒नः॑पू॒र्णे॑न॒वा॒व॒न॒त् ॥ धा॒ता॒प्र॒जा
या॑उ॒त॒रा॒य॒ई॒शे॒धा॒ते॒दं॒वि॒श्वं॒भु॒व॒नं॒ज॒जा॒न ॥ धा॒ता॒पु॒त्रंय॑ज॒मा॒ना॒य॒दा॒त॒ात

स्माउहव्यंघृतवद्विधेम ॥ धातादददातुनोरयिंप्राचींजीवातुमक्षितां ॥
वयंदेवस्यधीमहिसुमतिꣳसत्यराधसः ॥ धातादददातुदाशुषेवसूनिप्रजा
कामायमीढुषेदुरोणे ॥ तस्मैदेवाअमृताःसंव्ययंतांविश्वेदेवासोअदितिः
सजोषाः ॥ अनुमन्यतामनुमन्यमानाप्रजावँतꣳरयिमक्षीयमाणं ॥ तस्यै
वयꣳहेडसिमापिभूमसानोदेवीसुहवाशर्मयच्छतु ॥ यस्यामिदंप्रदिशि
यद्विरोचतेनुमतिंप्रतिभूषंत्यायवः ॥ यस्याउपस्थउर्वंतरिक्षꣳसानोदेवी
सुहवाशर्मयच्छतु ॥ राकामहꣳसुहवासुष्टुतीहुवेशृणोतुनःसुभगाबो
धतुत्मना ॥ सीव्यत्वपःसूच्याच्छिद्यमानयाददातुवीरꣳशतदायमुक्थं ॥
यास्तेराकेसुमतयःसुपेशसोयाभिर्ददासिदाशुषेवसूनि ॥ ताभिर्नोअद्यसु
मनाउपागहिसहस्रपोषꣳसुभगेरराणा ॥ कुहूमहꣳसुभगांविद्मनापसम
स्मिन्यज्ञेसुहवाजोहवीमि ॥ सानोददातुश्रवणंपितृणांतस्यास्तेदेविहविषो

षाविधेम॥कुहूर्देवानाममृतस्यपत्नीहव्यानोअस्यहविषश्चिकेतु ॥ संदाग्नु
षेकिरतुभूरिवाम ँशयस्पोषंचिकितुषेदधातु॥६॥ तंतुतन्वन्रजसोभानु
मन्विहिज्योतिष्मतःपथोरक्षधियाकृतान् ॥ अनुल्बणंवयतजोगुवामपोम
नुर्भवजनयादैव्यंजनं ॥ चित्तंचचित्तिश्चाकूतंचाकूतिश्चविज्ञातंचविज्ञा
नंचमनश्चशक्वरीश्चदर्शश्चपूर्णमासश्चबृहच्चरथंतरंचप्रजापतिर्जयानिं
द्रायवृष्णेप्रायच्छदुग्रःपृतनाज्येषुतस्मैविशःसमनमंतसर्वाःसउग्रःसहिह
व्योबभूव ॥ अग्निर्भूतानामधिपतिःसमावर्त्विंद्रोज्येष्ठानांयमःपृथिव्या
वायुरंतरिक्षस्यसूर्योदिवश्चंद्रमानक्षत्राणांबृहस्पतिर्ब्रह्मणोमित्रःसत्यानां
वरुणोपाँसमुद्रःस्रोत्यानामन्न ँसाम्राज्यानामधिपतितन्मावतुसोमओ
षधीनाँसविताप्रसवानाँरुद्रःपशूनांत्वष्टारूपाणांविष्णुःपर्वतानांमरु
तोगणानामधिपतयस्तेमावंतुपितरःपितामहाःपरेवरेततास्तताम्हाइह

मावत ॥ अस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्न
स्यांदेवहूत्यां॥ वास्तोष्पतेप्रतिजानीह्यस्मान्स्वावेशोअनमीवोभवानः॥
यत्त्वेमहेप्रतितन्नोजुषस्वशन्नएधिद्विपदेशंचतुष्पदे ॥ वास्तोष्पतेशग्म
यासꣳसदातेसक्षीमहिरण्वयागातुमत्या ॥ आवःक्षेमउतयोगेवरेनोयूयं
पातस्वस्तिभिःसदानः ॥ यत्तेअग्नेतेजस्तेनाहंतेजस्वीभूयासंयत्तेअग्नेव
र्चस्तेनाहंवर्चस्वीभूयासंयत्तेअग्नेहरस्तेनाहꣳहरस्वीभूयासं ॥ अभित्वा
देवसवितरीशानंवार्याणां ॥ सदावन्भागमीमहे ॥ त्वामग्नेपुष्करादध्य
थर्वानिरमंथत ॥ मूर्ध्नोविश्वस्यवाघतः ॥ अयमग्निःसहस्रिणोवाजस्यशृ
तिनस्पतिः ॥ मूर्धाकवीरय्रीणां ॥ ७ ॥ इतितृतीयाष्टकःसमाप्तः ॥
युंजानःप्रथममनस्तत्त्वायसवितताधियः ॥ अग्निंज्योतिर्निचाय्यपृथिव्या
अध्याभरत् ॥ युक्त्वायमनसादेवान्त्सुवर्यतोधियादिवं ॥ बृहज्ज्योतिःक

रिष्यतःसविताप्रसुवातितान् ॥ युक्तेनमनसावयंदेवस्यसवितुःसवे ॥ सु
वर्गेयायशक्त्यै ॥ युंजतेमनउतयुंजतेधियोविप्राविप्रस्यबृहतोविपश्चितः ॥
विहोत्रादधेवयुनाविदेकइन्महीदेवस्यसवितुःपरिष्टुतिः ॥ युजेवांब्रह्मपू
र्व्यनमोभिर्विश्लोकायंतिपथ्येवसूराः ॥ शृण्वंतिविश्वेअमृतस्यपुत्राआये
धामानिदिव्यानितस्थुः ॥ यस्यप्रयाणमन्वन्यइद्ययुर्देवादेवस्यमहिमान
मर्चतः ॥ यःपार्थिवानिविममेसएतशोरजा॑सिदेवःसवितामहित्वना ॥
देवसवितःप्रसुवयज्ञंप्रसुवयज्ञपतिंभगायदिव्योगंधर्वः ॥ केतपूःकेतन्नः
पुनातुवाचस्पतिर्वाचंमद्यस्वदातिनः ॥ इमन्नोदेवसवितर्यज्ञंप्रसुवदेवा
युव॑सखिविद॑सत्राजितंधनजित॑सुवर्जितं ॥ ऋचास्तोम॑समर्धय
गायत्रेणरथंतरं ॥ बृहद्गायत्रवर्तनि ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बा
हुभ्यांपूष्णोहस्ताभ्यांगायत्रेणछंदसादेंगिरस्वदभ्रिरसिनारिरसिपृथि

व्याःसधस्थादग्निंपुरीष्यमंगिरस्वदाभरत्रैष्टुभेनत्वाछंदसादेदेंगिरस्वत्व
भ्रिरसिनारिरसित्वयावयꣳसधस्थआग्निꣳशकेमखनितुंपुरीष्यंजागर्तेन
त्वाछंदसादेदेंगिरस्वद्धस्तंआधायसविताविभ्रदग्निꣳहिरण्ययीं ॥ तया
ज्योतिरजस्रमिदमिंखात्वीनआभरानुष्टुभेनत्वाछंदसादेदेंगिरस्वत् ॥१॥
योगेयोगेतवस्तरंवाजेवाजेहवामहे ॥ सखायइंद्रमूतये ॥ ओषधयःप्रति
मोदध्वमेनंपुष्पावतीःसुपिप्पलाः ॥ अयंवोगर्भऋत्वियःप्रत्नꣳसधस्थ
मासदत् ॥ हिरण्यगर्भःसमवर्तताग्रेभूतस्यजातःपतिरेकआसीत् ॥ सदा
धारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॥ यःप्राणतोनिमिषतोमहि
त्वैकइद्राजाजगतोबभूव ॥ यईशेअस्यद्विपदश्चतुष्पदःकस्मैदेवायहविषा
विधेम ॥ यआत्मदाबलदायस्यविश्वउपासतेप्रशिषंयस्यदेवाः ॥ यस्य
छायामृतंयस्यमृत्युःकस्मैदेवायहविषाविधेम ॥ यस्येमेहिमवंतोमहित्वा

यस्यसमुद्रꣳरसयासहाहुः ॥ यस्येमाःप्रदिशोयस्यबाहूकस्मैदेवायहविषा
विधेम ॥ यंक्रंदसीअवसातस्तभानेअभ्यैक्षेतांमनसारेजमाने ॥ यत्रा
धिसूरउदितौव्येतिकस्मैदेवायहविषाविधेम ॥ येनद्यौरुग्राःपृथिवीचदृढे
येनसुवस्तभितंयेननाकः ॥ योअंतरिक्षेरजसोविमानःकस्मैदेवायहविषा
विधेम ॥ आपोहयन्महतीर्विश्वमायंदक्षंदधानाजनयंतीरग्निं ॥ ततोदेवा
नांनिरवर्ततासुरेकःकस्मैदेवायहविषाविधेम ॥ यश्चिदापोमहिनापर्यपश्य
दक्षंदधानाजनयंतीरग्निं ॥ योदेवेष्वधिदेवएकआसीत्कस्मैदेवायहविषा
विधेम ॥ पार्वीरवीकन्याचित्रायुःसरस्वतीवीरपत्नीधियंधात् ॥
माभिरच्छिद्रꣳशरणꣳसजोषादुराधर्षंगृणतेशर्मयꣳसत् ॥ २ ॥ अग्ने
भ्यावर्तिन्नभिनआवर्तस्वायुषावर्चसासन्यामेधयाप्रजयाधनेन ॥ अग्ने
अंगिरःशतंतेसंत्वावृतःसहस्रंतउपावृतः ॥ तासांपोषस्यपोषेणपुनर्नो

नष्टमाकृधिपुनर्नोरयिमाकृधि ॥ पुनस्त्वादित्यारुद्रावसवःसमिंधतांपुनर्ब्रह्माणोवसुनीथयज्ञैः ॥ घृतेनत्वंतनुवोवर्धयस्वसत्याःसंतुयजमानस्यकामाः ॥ अपेतवीतविचसर्पतातोयेत्रस्थपुराणायेचनूतनाः ॥ अदादिदंयमोवसानंपृथिव्याअक्रन्निमंपितरोलोकमस्मै ॥ इडामग्नेपुरुदꣳसꣳसनिंगोःशश्वत्तमꣳहवमानायसाध ॥ स्यान्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ॥ अयंतेयोनिर्ऋत्वियोयतोजातोअरोचथाः ॥ तंजानन्नग्नआरोहाथानोवर्धयारयिं ॥ असुन्वंतमयजमानमिच्छस्तेनस्येत्यांतस्करस्यान्वेषि ॥ अन्यमस्मदिच्छसातइत्यानमोदेविनिर्ऋतेतुभ्यमस्तु ॥ देवीमहंनिर्ऋतिंवंदमानःपितेवपुत्रंदसयेवचोभिः ॥ विश्वस्यायाजायमानस्यवेदशिरःशिरःप्रतिसूरीविचष्टे ॥ संतेपयाꣳसिसमुयंतुवाजाःसंवृष्णिंयान्यभिमातिषाहः ॥ आप्यायमानोअमृताय सोमदिविश्रवाꣳस्युत्तमा

निधिष्व ॥ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्नियाउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ द्रप्सश्चस्कंदपृथिवीमनुद्यामिमंचयोनिमनुयश्चपूर्वः ॥ तृतीयंयोनिमनुसंचरंतंद्रप्संजुहोम्यनुसप्तहोत्राः ॥ मरुतांयस्यहिक्षयेपाथादिवोविमहसः ॥ ससुगोपातमोजनः ॥ ३ ॥ इयमेवसायाप्रथमाव्यौच्छदंतरस्यांचरतिप्रविष्टा ॥ वधूर्जजाननवगञ्जनित्रीत्रयएनांमहिमानःसचंते ॥ छंदस्वतीउषसापेपिशानेसमानंयोनिमनुसंचरंती ॥ सूर्यपत्नीविचरतःप्रजानतीकेतुंकृण्वानेअजरेभूरिरेतसा ॥ ऋतस्यपंथामनुतिस्रआगुस्त्रयोघर्मासोअनुज्योतिषागुः ॥ प्रजामेकारक्षत्यूर्जमेकाव्रतमेकारक्षतिदेवयूनां ॥ अग्निमीडेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमं ॥ अबोध्यग्निःसमिधाजनानांप्रतिधेनुमिवायतीमुषासं ॥ यह्वाइवप्रवयामुज्जिहानाःप्रभानवः

सिस्रतेनाक्रमच्छ ॥ ४ ॥ प्रजापतिर्मनसांधोच्छैतोधातादीक्षाया ऽस
विताभृत्यांपूषासोमक्रय्यण्यांवरुणउपनद्धोसुरःक्रीयमाणोमित्रःक्रीतःशि
पिविष्टआसादितोनरंधिषःप्रोह्यमाणोधिपतिरागतःप्रजापतिःप्रणीय
मानोग्निराग्नीध्रेबृहस्पतिराग्नीध्रात्प्रणीयमानइंद्रोहविर्धानेदितिरासादि
तोविष्णुरुपावह्रियमाणोथर्वोपोत्तोयमोभिषुतोपूतपाआधूयमानोवायुः
पूयमानोमित्रःक्षीरश्रीर्मथीसंक्रुश्रीर्वैश्वदेवउन्नीतोरुद्रआहुतोवायुरावृत्तो
नृचक्षाःप्रतिख्यातोभक्षआगतःपितृणांनाराश ऽसोसुरात्तःसिंधुरवभृथ
मवप्रयन्त्समुद्रोवगतःसलिलःप्रप्लुतःसुवरुदचंगतः॥५॥ बृहत्सामक्षत्र
भृद्वृद्धवृष्णियंत्रिष्टुभौजःशुभितमुग्रवीरं ॥ इंद्रस्तोमेनपंचदशेनमध्यमि
दंवातेनसगरेणरक्ष॥ अश्मन्नूर्जपर्वतेशिश्रियाणांवातेपर्जन्येवरुणस्यशु
ष्मै ॥ अश्व्योषधीभ्योवनस्पतिभ्योधिसंभृतांतान्नइषमूर्जंधत्तमरुतःस

ꣳरराणाः ॥ अश्मꣳस्तेक्षुदसुतेशुगृच्छतुयंहिष्मः ॥ समुद्रस्यत्वावाक्
यान्नेपरिव्ययामसि ॥ पावकोअस्मभ्यꣳशिवोभव ॥ हिमस्यत्वाजरायुणा
ग्नेपरिव्ययामसि ॥ पावकोअस्मभ्यꣳशिवोभव ॥ उपज्मन्नुपवेतसेवत्तरं
नदीष्वा ॥ अग्नेपित्तमपामसि ॥ मंड्किताभिरागहिसेमन्नोयज्ञं ॥ पाव
कवर्णꣳशिवंकृधि ॥ पावकआचितयंत्याकृपा ॥ क्षामन्नरुचउषसोन
भानुना ॥ तूर्वन्नयामन्नेतशस्यनूरणआयोघृणे ॥ नतंतृषाणोअजरः ॥
अग्नेपावकरोचिषामंद्रयादेवजिह्वया ॥ आदेवान्वक्षियक्षिच ॥ सनः
पावकदीदिवोग्नेदेवाꣳइहावह ॥ उपयज्ञꣳहविश्चनः ॥ अपामिदंन्ययं
नꣳसमुद्रस्यनिवेशनं ॥ अन्यंतेअस्मत्तपंतुहेतयःपावकोअस्मꣳशिवोभ
व ॥ नमस्तेहरसेशोचिषेनमस्तेअस्त्वर्चिषे ॥ अन्यंतेअस्मत्तपंतुहेतयः
पावकोअस्मभ्यꣳशिवोभव ॥ नृषदेवड्घृषदेवड्घृनसदेवट्बर्हिषदेवट्

सुवर्विदेवट् ॥ येदेवादेवानौयज्ञियायज्ञियानाꣳसंवत्सरीणमुपभागमास ते। अहुतादोहविषोयज्ञेअस्मिन्त्स्वयंजुहुध्वंमधुनोघृतस्य ॥ येदेवादेवेष्व धिदेवत्वमायन्येब्रह्मणःपुरएतारोअस्य ॥ येभ्योनतेपर्वतेधामकिंचननते दिवोनपृथिव्याअधिस्नुषु ॥ प्राणदाअपानदाव्यानदाश्चक्षुर्दावर्चोदाव रिवोदाः ॥ अन्यंतेअस्मत्पंतुहेतयःपावकोअस्मभ्यꣳशिवोभव ॥ अग्नि स्तिग्मेनशोचिषायꣳसद्विश्वंन्यत्रिणं ॥ अग्निर्नौवꣳसतेरयिं ॥ सैना नीकेनसुविदत्रोअस्मेयष्टादेवाꣳआयजिष्ठस्वस्ति ॥ अदब्धोगोपाउतनः परस्पाअग्नेद्युमदुतरेवादिदीहि ॥ ६ ॥ मनोयुजंवाजेअद्याहुवेम ॥ सनो नेदिष्ठाहवनानिजोषतेविश्वशंभूरवसेसाधुकर्मा ॥ विश्वकर्मन्हविषावा वृधानःस्वयंयजस्वतनुवंजुषाणः ॥ मुह्यत्वन्येअभितःसपत्नाइहास्माकं मघवासूरिरस्तु ॥ विश्वकर्मन्हविषावर्धनेनत्रातारमिंद्रमकृणोरवध्यं ॥

तस्मैविशःसमनमंतपूर्वीर्यमुग्रोविहव्योयथासत् ॥ समुद्रायवयुनायसिं
धूनांपतयेनमः ॥ नदीनाꣳसर्वीसांपित्रेजुहुताविश्वकर्मणेविश्वाहास
र्त्यꣳहविः ॥ इंद्रंविश्वाअवीवृधन्समुद्रव्यचसंगिरः ॥ रथीतमꣳरथी
नांवाजानाꣳसत्पतिंपतिं ॥ आजुह्वानःसुप्रतीकःपुरस्तादग्नेस्वायोनि
मासीदसाध्या ॥ अस्मिन्सधस्थेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसी
दत ॥ आमावाजस्यप्रसवोजगम्यादाद्यावापृथिवीविश्वशंभू ॥ आमा
गंतांपितरामातराचामासोमोअमृतत्वायगम्यात् ॥ स्वादुषꣳसदःपित
रोवयोधाःकृच्छ्रेश्रितःशक्तीवंतोगभीराः ॥ चित्रसेनाइषुबलाअमृध्राःस
तोवीराउरवोव्रातसाहाः ॥ ब्राह्मणासःपितरःसोम्यासःशिवेनोद्यावापृ
थिवीअनेहसा ॥ पूषानःपातुदुरितादृतावृधोरक्षासामाकिर्नोअघशꣳसई
शत ॥ अहिरिवभोगैःपर्येतिबाहुंज्यायाहेतिंपरिबाधमानः ॥ हस्तघ्नो

विश्वावयुनानिविद्वान्पुमान्पुमाꣳसंपरिपातुविश्वतः ॥ उपश्वासयपृथिवीमुतद्यांपुरुत्रातेमनुतांविष्ठितंजगत् ॥ सदुंदुभेसजूरिंद्रेणदेवैदूरादवीयोअपसेधशत्रून् ॥ आमूरंजप्रत्यावर्तयेमाःकेतुमदुंदुभिर्वावदीति ॥ समश्वपर्णाश्चरंतिनोनरोस्माकमिंद्ररथिनोजयंतु ॥ यदक्रंदःप्रथमंजायमानउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यं महिजातंतेअर्वन् ॥ यत्तेगात्रादग्निनापच्यमानादभिशूलंनिहतस्यावधावति ॥ मातरंधूम्यामाश्रिषन्मातृणेषुदेवेभ्यस्तदुशन्योरातमस्तु ॥ वाजे वाजेवतवाजिनोनोधनेषुविप्राअमृताऋतज्ञाः ॥ अस्यमध्वःपिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः ॥ पयःपृथिव्यांपयओषधीषुपयोदिव्यं तरिक्षेपयोधां॥ पयस्वतीःप्रदिशःसंतुमह्यं॥७॥ इतिचतुर्थाष्टकसमाप्तः॥

अवरुंधेमुंजानवदधात्यूर्ग्वैमुंजाऊर्जमेवास्माअपिदधात्यग्निर्देवेभ्योनि

लायत्सकुमुकंप्राविशत्कुमुकमवदधातियदेवास्यतन्न्यक्तंतदेवावरुंध
आज्येनसंयौत्येतद्वाअग्नेःप्रियंधामयदाज्यंप्रियेणैवैनंधाम्नासमर्धयत्यथो
तेजसावैकंकतीमादधातिभाएवावरुंधेशमीमयीमादधातिशांत्यैसीदत्वं
मातुरस्याउपस्थइतितिसृभिर्जातमुपतिष्ठतेत्रयइमेलोकाएष्वेवलोकेष्वा
विदंगच्छत्यथोप्राणानेवात्मन्धत्ते॥१॥प्रजापतेरक्ष्यश्वयत्तत्परापतत्तद
श्वोभवद्यदश्वयत्तदश्वस्याश्वत्वंतद्देवाअश्वमेधेनैवप्रत्यदधुरेषवैप्रजापति
ꣳसर्वंकरोतियोश्वमेधेनयजतेसर्वएवभवतिसर्वस्यवाएषाप्रायश्चित्तिःस
र्वस्यभेषजꣳसर्ववाएतेनपाप्मानंदेवाअतरन्नपिवाएतेनब्रह्महत्यामतर
न्त्सर्वंपाप्मानंतरतितरतिब्रह्महत्यांयोश्वमेधेनयजतेयउचैनमेवंवेदोत्तरं
वैतत्प्रजापतेरक्ष्यश्वयत्तस्मादश्वस्योत्तरतोवध्यंतिदक्षिणतोन्येषांपशूनांवै
तसःकटोभवत्यप्सुयोनिर्वाअश्वोप्सुजोवैतसःस्वएवैनंयोनौप्रतिष्ठापय

तिचतुष्टोमस्तोमोभवतिसरद्ध्वाअश्वस्यसक्थ्याबृहद्रथन्तरदेवाश्चतुष्टोमेनैव
प्रत्यदधुर्यच्चतुष्टोमस्तोमोभवत्यश्वस्यसर्वत्वाय ॥ २॥ वसोर्धारांजुहोति
वसोर्मेधारासदितिवाएषाहूयतेघृतस्यवाएनमेषाधारामुष्मिन्लोकेपिन्वे
मानोपतिष्ठतआज्येनजुहोतितेजोवाआज्यंतेजोवसोर्धारातेजसैवास्मैते
जोवरुंधेथोकामावैवसोर्धाराकामानेवावरुंधेयंकामयेतप्राणान्स्यान्नाद्यं
विच्छिद्यामितिविग्राहंतस्यजुहुयात्प्राणानेवास्यान्नाद्यंविच्छिनत्तियंकाम
येतप्राणान्स्यान्नाद्य९ंसंतनुयामितिसंततांतस्यजुहुयात्प्राणानेवास्यान्ना
द्य९ंसंतनोतिद्वादशद्वादशानिजुहोतिद्वादशमासाःसंवत्सरःसंवत्सरेणै
वास्माअन्नमवरुंधेन्नैचमेक्षुच्चमइत्याहैतद्वाअन्नस्यरूप९रूपेणैवान्नमवरुं
धेग्निश्चमआपश्चमइत्याहैषावाअन्नस्ययोनिःसयोन्येवान्नमवरुंधेर्द्वैद्राणि
जुहोतिदेवताएवावरुंधेयत्सर्वैषामर्धमिंद्रःप्रतितस्मादिंद्रोदेवतानांभूयि

चमे ॥ सर्वाꣳअग्नीꣳरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ॥ यदुदः
संप्रयतीरहावनदताहते ॥ तस्मादान्द्योनामस्थतावोनामानिसिंधवः ॥
यत्प्रेषितावरुणेनताःशीभगꣳसमवल्गत ॥ तदाप्नोदिंद्रोवोयतीस्तस्मा
दापोअनुस्थन ॥ अपकामꣳस्यंदमानाअवीवरतवोहिकं ॥ इंद्रोवःशक्ति
भिर्देवीस्तस्माद्वार्णामवोहितं ॥ एकोद्देवोअप्यतिष्ठत्स्यंदमानायथावशं ॥
उदानिषुर्महीरितितस्मादुदकमुच्यते ॥ आपोभद्राघृतमिदापआसुरग्नी
षोमौबिभ्रत्यापइत्ताः ॥ तीव्रोरसोमधुपृचामरंगमआमाप्राणेनसहवर्च
सागन् ॥ आदित्पश्याम्युतवाशृणोम्यामाघोषोगच्छतिवाङ्नआसां ॥
मन्येभेजानोअमृतस्यतर्हिहिरण्यवर्णाअतृपंयदावः ॥ आपोहिष्ठामयो
भुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्य
भाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयाय

॥ २२ ॥

जिन्वथ ॥ आपोजनयथाचनः ॥ दिविश्रयस्वांतरिक्षेयतस्वपृथिव्या संभवब्रह्मवर्चसमसिब्रह्मवर्चसायत्वा ॥ मयिगृह्णाम्यग्रेअग्निꣳरायस्पो षायसुप्रजास्त्वायसुवीर्यायꣳ ॥ मयिप्रजांमयिवर्चोदधाम्यरिष्टास्यामतनु वासुवीराः ॥ योनोअग्निःपितरोहृत्स्वंतरमर्त्योमर्त्याꣳआविवेशꣳ ॥ तमा त्मन्परिगृह्णीमहेवयंमासोअस्माꣳअवहायपरागात् ॥ ५ ॥ इतिपंचमा ष्टकसमाप्तः ॥

नेष्टुःपत्नींमुदानयेत्याहाग्नीद्वेवनेष्टरिरेतोदधातिनेष्टापत्नियामुद्वात्रासं ख्यापयतिप्रजापतिर्वाएषयद्दुद्वाताप्रजानांप्रजननायापउपप्रवर्तयतिरे तएवततसिंचत्यूरुणोपप्रवर्तयत्यूरुणाहिरेतःसिच्यतेनमꣳकृत्योरुमुपप्रव र्तयतियदाहिनमꣳऊरुर्भवत्यथमिथुनीभवतोथरेतःसिच्यतेथप्रजाःप्रजा

यंते ॥ यन्मेमनःपरागत्यंद्वामेअपरागतं ॥ राज्ञासोमेनतद्वयमस्मासु
धारयामसि ॥ १ ॥ इतिषष्ठाष्टकःसमाप्तः ॥
आजिंघ्रकलशंमह्युरुधारापयस्वत्यात्वाविशंत्विंदवःसमुद्रमिवसिंधवः
सामासहस्रआभजप्रजयापशुभिःसहपुनर्माविशताद्रयिः ॥ लोकःसर
स्वत्यायात्येषवैदेवयानःपंथास्तमेवान्वारोहंत्याक्रोशंतोयांत्यवर्तिमेवान्य
स्मिन्प्रतिपद्यप्रतिष्ठांगच्छंतियदादशशतंकुर्वत्यथैकमुत्थान ँशतायुःपु
रुषःशतेंद्रियआयुष्येवेंद्रियेप्रतितिष्ठंतियदाशत ँसहस्रंकुर्वत्यथैकमुत्था
न ँसहस्रसंमितोवाअसौलोकोमुमेवलोकमभिजयंतियदेषांप्रमीयेतय
दावाजीयेरन्नथैकमुत्थानंतद्वितीर्थं ॥ १ ॥ सयोभूर्वातोअभिवातूस्रा
ऊर्जस्वतीरोषधीरारिशंतां ॥ पीवस्वतीर्जीवधन्याःपिबंत्ववसायपद्वते
रुद्रसूड ॥ याःसरूपाविरूपाएकरूपायासामग्निरित्यानामानिवेद ॥

याअंगिरस्तपसेहचक्रुस्ताभ्यःपर्जन्यमहिशर्मयच्छ ॥ यादेवेषुतनुवमैरयंतयासा९सोमोविश्वारूपाणिवेद ॥ ताअस्मभ्यंपयसापिन्वमानाःप्रजावतीरिंद्रगोष्ठेरिरीहि ॥ प्रजापतिर्मह्यमेतारराणोविश्वैर्देवैःपितृभिःसंविदानः ॥ शिवाःसतीरुपनोगोष्ठमाक्रस्तासांवयंप्रजयासꣳसंदेम ॥ इहधृतिःस्वाहेहविधृतिःस्वाहेहरंतिःस्वाहेहरमतिःस्वाहामहीमूषुसुत्रामाणं ॥ २ ॥ किꣳस्विदासीत्पूर्वचित्तिःकिꣳस्विदासीत्बृहद्वयः ॥ किꣳस्विदासीत्पिशंगिलाकिꣳस्विदासीत्पिलिप्पिला ॥ द्यौरासीत्पूर्वचित्तिरश्वआसीत्बृहद्वयः ॥ रात्रिरासीत्पिशंगिलाविरासीत्पिलिप्पिला ॥ कःस्विदेकाकीचरतिकउस्विज्जायतेपुनः ॥ किꣳस्विद्धिमस्यभेषजंकिꣳस्विदावपनंमहत् ॥ सूर्यएकाकीचरतिचंद्रमाजायतेपुनः ॥ अग्निर्हिमस्यभेषजंभूमिरावपनंमहत् ॥ पृच्छामित्वापरमंतंपृथिव्याःपृच्छामित्वा

भुवनस्यनाभिं ॥ पृच्छामित्वावृष्णोअश्वस्यरेतःपृच्छामिवाचःपरमंव्यो
म ॥ वेदिमाहुःपरमंतंपृथिव्यायज्ञमाहुर्भुवनस्यनाभिं ॥ सोममाहुर्वृ
ष्णोअश्वस्यरेतोब्रह्मैववाचःपरमंव्योम ॥ ३ ॥ आब्रह्मन्ब्राह्मणोब्रह्म
वर्चसीजायतामास्मिन्राष्ट्रेराजन्यइषव्यःशूरोमहारथोजायतांदोग्ध्रीधे
नुर्वोढानड्वानाशुःसप्तिःपुरंधिर्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमान
वीरोजायतांनिकामेनिकामेनःपर्जन्योवर्षतुफलिन्योनओषधयःपच्यंतां
योगक्षेमोनःकल्पतां ॥ नमोमयेपृथिविक्षितेलोकस्पृतेलोकम्सैयजमा
नायदेहिनमोवायवेंतरिक्षक्षितेलोकस्पृतेलोकम्सैयजमानायदेहिनमः
सूर्यायदिविक्षितेलोकस्पृतेलोकम्सैयजमानायदेहि ॥ ४ ॥ इतिमंत्र
संहितासप्तमाष्टकःसमाप्तः ॥
नमःककुभायनिषंगिणेस्तेनानांपतयेनमः ॥ नमोनिषंगिणइषुधिमते

तस्करा॒णांप॑तये॒नमः॑ ॥ नमो॑नि॒षं॒गिणे॑चेषु॒धि॒म॒ते॑च ॥ ये॒ती॒र्था॑नि॑प्र॒च
रं॑तिसृ॒कावं॑तो॒नि॒षं॒गिणः॑ ॥ तेषा॑ꣳसहस्रयोज॒नेव॒धन्वा॑नितन्मसि ॥
सइषु॑हस्तै॒ःस॒नि॒षं॒गि॒भि॒र्व॒शीस॑ꣳस्र॒ष्टा॒सयु॒ध॒इंद्रो॑ग॒णेन॑ ॥ स॒ꣳसृ॒ष्ट॒जि
त्सो॑म॒पाबा॑हुश॒र्ध्यू॑र्ध्वध॒न्वा॒प्र॒ति॒हि॒ता॒भि॒रस्ता॑ ॥ १ ॥ समि॒द्ध॒स्य॒श्र॒य॒मा
ण॒ःपु॒र॒स्ता॒द्ब्र॒ह्म॒व॒न्वा॒नोअ॒ज॒र॑ꣳसु॒वी॒रे॑ ॥ आ॒रेअ॒स्मद॑मतिं॒बा॒धमा॑न॒उच्छ्र॑य
स्वमहते॒सौभ॑गाय ॥ वन॑स्पतेश॒तव॑ल्शो॒विरो॑ह॒स॒हस्र॑व॒ल्शा॒विव॒यꣳरु
हेम ॥ यं॒त्वा॒यꣳस्व॒धि॒ति॒स्तेति॑जानः॒प्रणि॒नाय॑महते॒सौभ॑गाय ॥ सं॒दि॒
व्येन॑दीदि॒हि॒रो॒च॒ने॒न॒वि॒श्वा॒आ॒भा॒हि॒प्र॒दिशः॑पृथि॒व्याः ॥ सं॒चे॒ध्य॒स्वा॒ग्ने॒
प्रचे॑बोधयै॒न॒मु॒च्चा॒ति॒ष्ठ॒महते॒सौभ॑गाय ॥ बृह॑स्पतेसवितर्बो॒धय॑ै॒न॒ꣳस॒ꣳ
शि॑तं॒चि॒त्सं॒त॒रा॒ꣳस॒ꣳशि॑शाधि ॥ व॒र्धय॑ै॒नं॒महते॒सौभ॑गाय ॥ च॒तुः॒शि
खंडायुवतिःसुपेशा॑घृतप्रतीका॒भुव॑नस्य॒मध्ये॑ ॥ म॒र्मृ॒ज्य॒मा॑ना॒महते॒सौभ॑

गाय ॥ नर्यप्रजांमेगोपाय ॥ अमृतत्वायजीवसे ॥ जातांजनिष्यमाणांच ॥ अमृतेसत्येप्रतिष्ठितां ॥ अथब्राह्मणप्रारंभः ॥ ॐउद्वन्यमा नमस्याअमेध्यं ॥ अपप्राप्मानंयजमानस्यहंतु ॥ शिवानःसंतुप्रदिशः श्चतस्रः ॥ शन्नोमातापृथिवीतोकसाता ॥ वैश्वानरस्यरूपं ॥ पृथिव्यां परिस्रसा ॥ स्योनमाविशंतुनः ॥ अग्नेरेतश्चंद्रꣳहिरण्यं ॥ अद्भ्यःसंभृ तमृतंप्रजासु ॥ तत्संभरन्नुत्तरतोनिधाय ॥ अतिप्रयच्छंदुरितंतरेयं ॥ नर्यप्रजांमेगोपाय ॥ अमृतत्वायजीवसे ॥ जातांजनिष्यमाणांच ॥ अमृतेसत्येप्रतिष्ठितां ॥ अथर्वापितुंमेगोपाय ॥ रसमन्नमिहायुषे ॥ अद ब्धायोशीततनो ॥ अविषन्नःपितुंकृणु ॥ शꣳस्यपशून्मेगोपाय ॥ द्वि पादोयेचतुष्पदः ॥ अष्टाशफाश्चयइहाग्मे ॥ येचैकशफाआशुगाः ॥ सप्रथसभांमेगोपाय ॥ येचसभ्याःसभासदः ॥ तानिंद्रियावतःकुरु ॥

सर्वमायुरुपासतां ॥ अहेबुध्नियमंत्रमेगोपाय ॥ यमृषयस्त्रयिविदा
विदुः ॥ ऋचःसामानियजूꣳषि ॥ साहिःश्रीरमृतासुतां ॥ चतुःशिखं
डायुवतिःसुपेशाः ॥ घृतप्रतीकाभुवनस्यमध्ये ॥ मर्मृज्यमानामहतेसौ
भगाय ॥ महीधुक्ष्वयजमानायकामान् ॥ इहैवसंतन्नसतोवोअग्नयः ॥
प्राणेनवाचामनसाबिभर्मि ॥ तिरोमासंतमायुर्मात्रहासीत् ॥ ज्योतिषा
वोवैश्वानरेणोपतिष्ठे ॥ पंचधाग्नीन्व्यक्रामत् ॥ विराट्सृष्टाप्रजापतेः ॥
ऊर्ध्वारोहद्रोहिणी ॥ योनिरग्नेःप्रतिष्ठितिः ॥ १ ॥ संततिर्वाएतेग्रहाः ॥
यत्परꣳसामानः ॥ विषूवांदिवाकीर्त्यै ॥ यथाशालायैपक्षसी ॥ एवꣳसंव
त्सरस्यपक्षसी ॥ यदेतेनगृह्णेरन् ॥ विषूचीसंवत्सरस्यपक्षसीन्यर्वञ्चꣳसे
यातां ॥ आर्तिमार्च्छेयुः ॥ यदेतेगृह्यंते ॥ यथाशालायैपक्षसीमध्यमंवꣳश
मभिसमायच्छति ॥ एवꣳसंवत्सरस्यपक्षसीदिवाकीर्त्यैमभिसंतन्वंति ॥

नार्तिमार्छति ॥ एकविꣳशमहर्भवति ॥ शुक्राग्रग्रहागृह्यंते ॥ प्रत्युत्त
ब्ध्यैसयत्वाय ॥ सौर्यएतदहःपशुरालभ्यते ॥ सौर्यौतिग्राह्योगृह्यते ॥
अहरेवरूपेणसमर्धयंति ॥ अथोअहएवैषबलिर्हियते ॥ सप्तैतदहरतिग्रा
ह्यागृह्यंते ॥ सप्तवैशीर्षण्याःप्राणाः ॥ असावादित्यःशिरःप्रजानां ॥ शीर्ष
न्नेवप्रजानांप्राणान्दधाति ॥ तस्मात्सप्तशीर्षन्प्राणाः ॥ इंद्रोवृत्रꣳहत्वा ॥
असुरान्पराभाव्य ॥ सइमान्लोकानभ्यजयत् ॥ तस्यासौलोकोनाभिजित
आसीत् ॥ तंविश्वकर्माभूत्वाभ्यजयत् ॥ यद्वैश्वकर्मणोगृह्यते ॥ सुवर्गस्य
लोकस्याभिजित्यै ॥ प्रवाएतैस्माल्लोकाच्यवंते ॥ यैवैश्वकर्मणंगृह्यते ॥
आदित्यश्चोगृह्यते ॥ इयंवाअदितिः ॥ अस्यामेवप्रतितिष्ठंति ॥ अन्यो
न्योगृह्येते ॥ विश्वान्येवान्येनकर्माणिकुर्वाणायंति ॥ अस्यामन्येनप्रति
तिष्ठंति ॥ तावापरार्धात्संवत्सरस्यान्योन्योगृह्येते ॥ तावुभौसहमहाव्र

तेगृह्यते ॥ यज्ञस्यैवांतंगत्वा ॥ उभयोर्लोकयोःप्रतितिष्ठति ॥ अक्र्यंमु
क्थंभवति ॥ अन्नाद्यस्यावरुध्यै ॥ २ ॥ इंद्रोवृत्र९हत्वा ॥ असुरान्प
राभाज्य ॥ सोमावास्यांप्रत्यागच्छत् ॥ तेपितरःपूर्वेद्युरागच्छन् ॥ पितृ
न्यज्ञोगच्छत् ॥ तंदेवाःपुनरयाचंत ॥ तमेभ्योनपुनरददुः ॥ तेब्रुवन्व
रंवृणामहै ॥ अथवःपुनर्दास्यामः ॥ अस्मभ्यमेवपूर्वेद्युःक्रियाताइति ॥
तमेभ्यःपुनरददुः ॥ तस्मात्पितृभ्यःपूर्वेद्युःक्रियते ॥ यत्पितृभ्यःपूर्वेद्युः
करोति ॥ पितृभ्यएवतद्यज्ञंनिष्क्रीययजमानःअतनुते ॥ सोमायपि
तृपीतायस्वधानमइत्याह ॥ पितुरेवाधिसोमपीथमवरुंधे ॥ नहिपिता
प्रमीयमाणआहैषसोमपीथइति ॥ इंद्रियंवैसोमपीथः ॥ इंद्रियमेवसोम
पीथमवरुंधे ॥ तेनैंद्रियेणाद्वितीयाँजायामभ्यश्नुते ॥ एतद्वैब्राह्मणंपुरा
वाजश्रवसाविदासंक्रन् ॥ तस्मात्तेहैद्वेजायेअभ्याक्षत ॥ यएवंवेद ॥

अभिद्वितीयांज्जायामंश्रुते ॥ अग्नयेकव्यवाहनायस्वधानमइत्याह ॥ यएवपितृणामग्निः ॥ तंप्रीणाति ॥ तिस्रआहुतीर्जुहोति ॥ त्रिर्निदधाति ॥ षट्संपद्यंते ॥ षड्वाऋतवः ॥ ऋतूनेवप्रीणाति ॥ तूष्णींमेक्ष णमादधाति ॥ अस्तिवाहिषष्ठऋतुर्नवा ॥ देवान्वैपितॄन्प्रीतान् ॥ मनुष्याःपितरोनुप्रापिबते ॥ तिस्रआहुतीर्जुहोति ॥ त्रिर्निदधाति ॥ षट् संपद्यंते ॥ षड्वाऋतवः ॥ ऋतवःखलुवैदेवाःपितरः ॥ ऋतूनेवदेवान्पि तॄन्प्रीणाति ॥ तान्प्रीतान् ॥ मनुष्याःपितरोनुप्रापिबते ॥ सकृदाच्छिन्नं बर्हिर्भवति ॥ सकृदिवहिपितरः ॥ त्रिर्निदधाति ॥ तृतीयेवाइतोलोके पितरः ॥ तानेवप्रीणाति ॥ पराङावर्तते ॥ लीकाहिपितरः ॥ ओष्म णोव्यावृतउपास्ते ॥ ऊष्मभागाहिपितरः ॥ ब्रह्मवादिनोवदंति ॥ प्राश्या३न्नप्राश्या३मिति ॥ यत्प्राश्नीयात् ॥ जन्यमन्नमद्यात् ॥ प्रमायु

कः स्यात् ॥ यन्नप्राश्नीयात् ॥ अहविः स्यात् ॥ पितृभ्य आवृश्च्येत ॥ अव
श्रेयसेव ॥ तन्नेव प्राशितेनेवाप्राशितं ॥ वीरं वावै पितरः प्रयंतोहरति ॥ वीरं
वा ददति ॥ दृशांछिनत्ति ॥ हरणभागा हि पितरः ॥ पितृनेवनिरवदयते ॥
उत्तरआयुषि लोमछिंदीत ॥ पितृणा ह्येतर्हिनेदीयः ॥ नमस्करोति ॥
नमस्कारोहि पितृणां ॥ नमोवः पितरोरसाय ॥ नमोवः पितरः शुष्माय ॥
नमोवः पितरोजीवाय ॥ नमोवः पितरः स्वधायै ॥ नमोवः पितरोमन्यवे ॥
नमोवः पितरोघोराय ॥ पितरोनमोवः ॥ यएतस्मिन्लोकेस्थ ॥ युष्माꣳ
स्तेनु ॥ येस्मिन्लोके ॥ मांतेनु ॥ यएतस्मिन्लोकेस्थ ॥ यूयंतेषांवसिष्ठा
भूयास्त ॥ येस्मिन्लोके ॥ अहंतेषांवसिष्ठोभूयासमित्याह ॥ वसिष्ठः
समानानांभवति ॥ यएवंविद्वान्पितृभ्यःकरोति ॥ एषवैमनुष्याणांयज्ञः ॥
देवानांवाइतरेयज्ञाः ॥ तेनवाएतत्पितृलोकेचरति ॥ यत्पितृभ्यःकरोति ॥

सईश्वरःप्रमेतोः ॥ प्राजापत्ययर्चापुनरौतिं ॥ यज्ञोवैप्रजापतिः ॥ यज्ञे
नैवसहपुनरौतिं ॥ नप्रमायुकोभवति ॥ पितृलोकेवाएतद्यजमानश्च
रति ॥ यत्पितृभ्यःकरोतिं ॥ सईश्वरआर्तिमार्तोः ॥ प्रजापतिस्त्वावैनं
ततउन्नेतुमर्हतीत्याहुः ॥ यत्प्राजापत्ययर्चापुनरौतिं ॥ प्रजापतिरेवैनं
ततउन्नयति ॥ नार्तिमार्छतियजमानः ॥ ३ ॥ यत्पुण्यंनक्षत्रं ॥ तद्धृ
कुर्वीतोपव्युषं ॥ यदावैसूर्योउदेतिं ॥ अथनक्षत्रंनैतिं ॥ यावतितत्रसूर्यो
गच्छेत् ॥ यत्रंजघन्यंपश्येत् ॥ तावतिकुर्वीतयत्कारीस्यात् ॥ पुण्याह
एवकुरुते ॥ तानिवाएतानियमनक्षत्राणिं ॥ यान्येवदैवनक्षत्राणिं ॥
तेषुकुर्वीतयत्कारीस्यात् ॥ पुण्याहएवकुरुते ॥ त्रीणित्रीणिवैदेवानामू
ह्यानिं ॥ त्रीणिछंदा ँसि ॥ त्रीणिसवनानि ॥ त्रयइमेलोकाः ॥ ऋध्या
मेवतद्वीर्यएषुलोकेषुप्रातितिष्ठति ॥ ४ ॥ अनुमत्यैपुरोडाशमष्टाकपालं

निर्वपति ॥ येप्रत्यंचःशम्यायाअवशीयंते ॥ तंनैर्ऋतमेककपालं ॥ इयं
वाअनुमतिः ॥ इयंनिर्ऋतिः ॥ नैर्ऋतेनपूर्वेणप्रचरति ॥ पाप्मानमेव
निर्ऋतिंपूर्वोश्निरवदयते ॥ एककपालोभवति ॥ एकधैवनिर्ऋतिंनिरव
दयते ॥ यदहुत्वागार्हपत्यईयुः ॥ रुद्रोभूत्वाग्निरनूथ्यायं ॥ अध्वर्युंच
यजमानंचहन्यात् ॥ वीहिस्वाहाहुतिंजुषाणइत्याह ॥ आहुत्यैवैनꣳश
मयति ॥ नार्तिमार्छत्यध्वर्युर्नयजमानः ॥ एकोल्मुकेनयंति ॥ तद्वि
निर्ऋत्यैभागधेयं ॥ इमांदिशंयंति ॥ एषावैनिर्ऋत्यैदिक् ॥ स्वायामेव
दिशिनिर्ऋतिंनिरवदयते ॥ स्वकृतइरिणेजुहोतिप्रदुरेवा ॥ एतद्वैनिर्ऋ
त्याआयतनं ॥ स्वएवायतनेनिर्ऋतिंनिरवदयते ॥ एषतेनिर्ऋतेभाग
इत्याह ॥ निर्दिशत्येवैनां ॥ भूतेहविष्मत्यसीत्याह ॥ भूतिमेवोपावर्तते ॥
मुंचेममꣳहसइत्याह ॥ अꣳहसएवैनंमुंचति ॥ अंगुष्ठाभ्यांजुहोति ॥

अंतत एवानिर्ऋतिंनिरवदयते ॥ कृष्णंवासःकृष्णतूषंदक्षिणा ॥ एतद्वै निर्ऋत्यैरूपं ॥ रूपेणैवानिर्ऋतिंनिरवदयते ॥ अप्रतीक्षमायंति ॥ निर्ऋत्याअंताहित्यै ॥ स्वाहानमोयइदंचकारेतिपुनरेत्यगार्हपत्येजुहोति ॥ आहुत्यैवनमस्यंतोगार्हपत्यमुपावर्तते ॥ आनुमतेनप्रचरति ॥ इयंवा अनुमतिः ॥ इयमेवास्मैराज्यमनुमन्यते ॥ धेनुर्दक्षिणा ॥ इमामेवधेनुं कुरुते ॥ आदित्यंचरुंनिर्वपति ॥ उभयीष्वेवप्रजास्वभिषिच्यते ॥ दैवीं षुचमानुषीषुच ॥ वरोदक्षिणा ॥ वरोहिराज्यꣳसमृध्यै ॥ अग्नावैष्ण वमेकादशकपालंनिर्वपति ॥ अग्निःसर्वादेवताः ॥ विष्णुर्यज्ञः ॥ देवता श्चैवयज्ञंचावरुंधे ॥ वामनोवहीदक्षिणा ॥ यद्वही ॥ तेनाग्नेयः ॥ यद्वा मनः ॥ तेनवैष्णवःसमृध्यै ॥ अग्नीषोमीयमेकादशकपालंनिर्वपति ॥ अग्नीषोमाभ्यांवाइंद्रोवृत्रमहन्नितिं ॥ यदग्नीषोमीयमेकादशकपालंनिर्व

संहिता

॥ २९ ॥

पति ॥ वात्रघ्नमेवविजित्यै ॥ हिरण्यंदक्षिणासमृध्यै ॥ इंद्रोवृत्रꣳहत्वा ॥
देवताभिश्चेंद्रियेणचव्यार्ध्यत ॥ सएतमैंद्राग्नमेकादशकपालमपश्यत् ॥
तंनिरवपत् ॥ तेनवैसदेवताश्चेंद्रियंचावारुंध ॥ यदैंद्राग्नमेकादशक
पालंनिर्वपति ॥ देवताश्चैवतेनैंद्रियंचयजमानोवरुंधे ॥ ऋषभोवहीद
क्षिणा ॥ यद्वही ॥ तेनाग्नेयः ॥ यदृषभः ॥ तेनैंद्रःसमृध्यै ॥ आग्नेय
मष्टाकपालंनिर्वपति ॥ ऐंद्रंदधि ॥ यदाग्नेयोभवति ॥ अग्निर्वैयज्ञमुखं ॥
यज्ञमुखमेवाधिपुरस्ताद्धत्ते ॥ यदैंद्रंदधि ॥ इंद्रियमेवावरुंधे ॥ ऋषभो
वहीदक्षिणा ॥ यद्वही ॥ तेनाग्नेयः ॥ यदृषभः ॥ तेनैंद्रःसमृध्यै ॥
यावतीर्वैप्रजाओषधीनामहुतानामाशन् ॥ ताःपराभवन् ॥ आग्रयणं
भवतिहुताद्याय ॥ यजमानस्यापराभावाय ॥ देवावाओषधीष्वाजि
मयुः ॥ ताइंद्राग्नीउदजयतां ॥ तावेतमैंद्राग्नंद्वादशकपालंनिरवृणातां ॥

यदैंद्राग्नोभवत्युज्जित्यै ॥ द्वादशकपालोभवति ॥ द्वादशमासाःसंवत्सरः ॥
संवत्सरेणैवास्माअन्नमवरुंधे ॥ वैश्वदेवश्चरुर्भवति ॥ वैश्वदेवंवाअन्नं ॥
अन्नमेवास्मैस्वदयति ॥ प्रथमजोवत्सोदक्षिणासमृध्यै ॥ सौम्य॰ ईर्या
माकंचरुंनिर्वपति ॥ सोमोवाअकृष्टपच्यस्यराजा ॥ अकृष्टपच्यमेवास्मै
स्वदयति ॥ वासोदक्षिणा ॥ सौम्य॰ हिदेवतयावासःसमृध्यै ॥ सरस्व
त्यैचरुंनिर्वपति ॥ सरस्वतेचरुं ॥ मिथुनमेवावरुंधे ॥ मिथुनौगावौद
क्षिणासमृध्यै ॥ एतिवाएषयज्ञमुखाद्ध्यः ॥ योग्नेदेवतायाएति ॥
अष्टावेतानिहवी॰ षिभवंति ॥ अष्टाक्षरागायत्री ॥ गायत्रौग्निः ॥ तैनै
वयज्ञमुखाद्ध्याअग्नेर्दैवतायैनैति ॥ ५ ॥ कृशिपुंकृशिपव्याय ॥ उप
बर्हणमुपबर्हण्याय ॥ आंजनमांजन्याय ॥ अभ्यंजनमभ्यंजन्याय ॥
यथाभागमेवैनान्प्रीणाति ॥ त्र्यंबकंयजामहइत्याह ॥ मृत्योर्मुक्षीयमा

मृतादितिर्वावैतदाह ॥ उत्किरंति ॥ भगस्यलीप्संते ॥ मूतेकृत्वासंजंति ॥ यथाजनंयतेवसंकरोति ॥ तादृगेवतत् ॥ एषतेरुद्रभागइत्याह निरवत्यै ॥ अप्रतीक्षमायंति ॥ अपःपरिषिंचति ॥ रुद्रस्यांतर्हित्यै ॥ प्रवाएतेसाल्लोकाच्यवंते ॥ येन्यंवकैश्चरंति ॥ आदित्यंचरुंपुनरेत्यनिर्वपति ॥ इयंवाअदितिः ॥ अस्यामेवप्रतितिष्ठंति ॥ ६ ॥ इतिप्रथमाष्टकसमाप्तः ॥

प्रजापतिःसोमꣳराजानमसृजत ॥ तंत्रयोवेदाअन्वसृज्यंत ॥ तान्हस्तेकुरुत ॥ अथहसीतासावित्री ॥ सोमꣳराजानंचकमे ॥ श्रद्धामुसचकमे ॥ साहपितरंप्रजापतिमुपससार ॥ तꣳहोवाच ॥ नमस्तेअस्तुभगवः ॥ उपत्वायानि ॥ प्रत्वापद्ये ॥ सोमंवैराजानंकामये ॥ श्रद्धामुसकामयतइति ॥ तस्याउहस्थागरमलंकारंकल्पयित्वा ॥ दशहोतारं

पुरस्ताद्व्यारव्यायं ॥ चतुर्होतारंदक्षिणतः ॥ पंचहोतारंपश्चात् ॥ षड्ढो
तारमुत्तरतः ॥ सप्तहोतारमुपरिष्टात् ॥ संभारैश्चपत्नीभिश्चमुखेलंकृत्य ॥
आस्यार्धवव्राज ॥ ताꣳहोदीक्ष्योवाच ॥ उपमावर्तस्वेति ॥ तꣳहोवाच ॥
भोगंतुमआचक्ष्व ॥ एतन्मआचक्ष्व ॥ यत्तेपाणाविति ॥ तस्याउहत्रीन्
वेदान्प्रददौ ॥ तस्मादुहस्त्रियोभोगमेवहारयंते ॥ सयःकामयेतप्रियःस्या
मिति ॥ यंवाकामयेतप्रियःस्यादिति ॥ तस्मादेतꣳस्यागरमलंकारंकल्प
यित्वा ॥ दशहोतारंपुरस्ताद्व्यारव्यायं ॥ चतुर्होतारंदक्षिणतः ॥ पंच
होतारंपश्चात् ॥ षड्ढोतारमुत्तरतः ॥ सप्तहोतारमुपरिष्टात् ॥ संभारैश्च
पत्नीभिश्चमुखेलंकृत्य ॥ आस्यार्धव्रजेत् ॥ प्रियोहैवभवति ॥ १ ॥ ब्रह्मा
त्मन्वदसृजत ॥ तदकामयत ॥ समात्मनापद्येयेति ॥ आत्मन्नात्मन्नि
त्यामंत्रयत ॥ तस्मैदशमꣳहूतःप्रत्यशृणोत् ॥ सदशंहूतोभवत् ॥ दश

हूतोहवैनामैषः ॥ तंवाएतंदशहूतꣳसंतं ॥ दशहोतेत्याचक्षतेपरोक्षेण ॥
परोक्षप्रियाइवहिदेवाः ॥ आत्मन्नात्मन्नित्यामैत्रयत ॥ तस्मैसप्तमꣳहूतः
प्रत्यशृणोत् ॥ ससप्तहूतोभवत् ॥ सप्तहूतोहवैनामैषः ॥ तंवाएतꣳसप्त
हूतꣳसंतं ॥ सप्तहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥
आत्मन्नात्मन्नित्यामैत्रयत ॥ तस्मैषष्ठꣳहूतःप्रत्यशृणोत् ॥ षपड्हूतोभ
वत् ॥ षड्हूतोहवैनामैषः ॥ तंवाएतꣳषड्हूतꣳसंतं ॥ षड्होतेत्याचक्षतेप
रोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ आत्मन्नात्मन्नित्यामैत्रयत ॥ तस्मै
पंचमꣳहूतःप्रत्यशृणोत् ॥ सपंचहूतोभवत् ॥ पंचहूतोहवैनामैषः ॥
तंवाएतंपंचहूतꣳसंतं ॥ पंचहोतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइव
हिदेवाः ॥ आत्मन्नात्मन्नित्यामैत्रयत ॥ तस्मैचतुर्थꣳहूतःप्रत्यशृणोत् ॥
सचतुर्हूतोभवत् ॥ चतुर्हूतोहवैनामैषः ॥ तंवाएतंचतुर्हूतꣳसंतं ॥

चतुर्होतेत्याचक्षतेपरोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ तमब्रवीत् ॥
त्वंवैमेनेदिष्ठꣳहुतःप्रत्यश्रौषीः ॥ त्वयैनानाख्याताइति ॥ तस्मान्नुहै
नाꣳश्रतुर्होताइत्याचक्षते ॥ तस्माच्छुश्रूषुःपुत्राणाꣳह्यतमः ॥ नेदिं
ष्ठोहव्यतमः ॥ नेदिष्ठोब्रह्मणोभवति ॥ यएवंवेद ॥ २ ॥ अग्नेरक्षाणो
अꣳहसः ॥ प्रतिष्मदेवरीषतः ॥ तपिष्ठैरजरोदह ॥ त्वमग्नेअयास्यया
सन्मनसाहितः ॥ अयासन्हव्यमूहिषेयानोधेहिभेषजं ॥ वयꣳसोम
व्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावंतोअशीमहि ॥ इहैवैधिमाव्यथिष्ठाः ॥
पर्वतइवाविचाचलिः ॥ इंद्रइवेहध्रुवस्तिष्ठ ॥ इहराष्ट्रमुधारय ॥ विचं
क्रमेपृथिवीमेषएतांक्षेत्रायविष्णुर्मनुषेदशस्यन् ॥ ध्रुवासोअस्यकीरयो
जनासउरुक्षितिꣳसुजनिमाचकार ॥ त्रिर्देवःपृथिवीमेषएतांविचक्रमे
शतर्चसंमहित्वा ॥ प्राविष्णुरस्तुतवसस्तवीयान्त्वेषꣳह्यस्यस्थविरस्य

नाम ॥ त्वꣳसोमक्रतुभिःसुक्रतुर्भूः ॥ त्वंदक्षैःसुदक्षोविश्ववेदाः ॥ त्वं
वृषावृषत्वेभिर्महित्वा ॥ द्युम्नेभिर्द्युम्न्यभवोनृचक्षाः ॥ समानीवआ
कूतिःसमानाहृदयानिवः ॥ समानमस्तुवोमनोयथावःसुसहासति ॥
आनोअग्नेसुक्रतुना ॥ रयिंविश्वायुपोषसं ॥ माडीकंधेहिजीवसे ॥ त्वꣳ
सोममहेभगं ॥ त्वंयूनऋतायते ॥ दक्षंदधासिजीवसे ॥ तदस्यप्रियम
भिपाथोअश्यांनरोयत्रदेवयवोमदंति॥ उरुक्रमस्यसहिबंधुरित्थाविष्णोः
पदेपरमेमध्वउत्सः ॥ गौरीमिमायसलिलानितक्षत्येकपदीद्विपदीसा
चतुष्पदी ॥ अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन् ॥ ३ ॥
आकूत्यैत्वाकामायत्वासमृधेत्वा ॥ पुरोदधेअमृतत्वायजीवसे ॥ आकू
तिमस्यावसे ॥ काममस्यसमृद्ध्यै ॥ इंद्रस्ययुंजतेधियः ॥ आकूतिंदेवीं
मनसःपुरोदधे ॥ यज्ञस्यमातासुहवामेअस्तु ॥ यदिच्छामिमनसास

कामः ॥ विदेयमेनद्धृदयेनिविष्टं ॥ क्षेत्रियैत्वानिर्ऋत्यैत्वा ॥ द्रुहोमुंचा
मिवरुणस्यपाशात् ॥ अनागसंब्रह्मणेत्वाकरोमि ॥ शिवेतेद्यावापृथिवी
उभेइमे ॥ शंतेअग्निःसहाद्भिरस्तु ॥ शंद्यावापृथिवीसहौषधीभिः ॥
शमंतरिक्ष ँसहवातेनते ॥ शंतेचतस्रःप्रदिशोभवंतु ॥ यादेवीश्चतस्रः
प्रदिशः ॥ वातपत्नीरभिसूर्योविचष्टे ॥ तासांत्वाजरसआदधामि ॥
प्रयक्ष्मंएतुनिर्ऋतिंपराचैः ॥ सूर्यमृतंतमसोग्राह्यायत् ॥ देवाअमुंचन्न
सृजन्त्येनसः ॥ एवमहमिमंक्षेत्रियाज्जामिश ँसात् ॥ द्रुहोमुंचामिवरु
णस्यपाशात् ॥ नाकेसुपर्णमुपयत्पतंत ँहृदावेनंतोअभ्यचक्षतत्वा ॥
हिरण्यपक्षंवरुणस्यदूतंयमस्ययोनौशकुनंभुरण्युं ॥ अप्सुमेसोमोअब्रवी
दंतर्विश्वानिभेषजा ॥ अग्निंचविश्वशंभुवमापश्चविश्वभेषजीः ॥ यदप्सु
तेसरस्वतिगोष्वश्वेषुयन्मधु ॥ तेनमेवाजिनीवतिमुखंमद्धिसरस्वति ॥

॥ ३३ ॥

यातेऽअग्नेयज्ञियातनूस्तयेह्यारोहात्मात्मानँ ॥ अच्छावसूनिकृण्वन्नसे
नर्यापुरूणि ॥ यज्ञोभूत्वायज्ञमासीदस्वांयोनिँ ॥ जातवेदोभुवआजायं
मानःसक्षयएहि ॥ उपावरोहजातवेदःपुनस्त्वं ॥ देवेभ्योहव्यंवहनः
प्रजानन् ॥ आयुःप्रजाꣳरयिमस्मासुधेहि ॥ अजस्रोदीदिहिनोदुरोणे
॥४॥ येसमानाःसमनसः ॥ पितरोयमराज्ये ॥ तेपाँलोकःस्वधानमः ॥
यज्ञोदेवेषुकल्पतां ॥ येसजाताःसमनसः ॥ जीवाजीवेषुमामकाः ॥
तेषाꣳश्रीर्मयिकल्पतां ॥ अस्मिन्लोकेशतꣳसमाः ॥ देवस्यत्वासवितुः
प्रसवे ॥ अश्विनोर्बाहुभ्यां ॥ पूष्णोहस्ताभ्यां ॥ अश्विनोर्भैषज्येन ॥
तेजसेब्रह्मवर्चसायाभिषिँचामि ॥ देवस्यत्वासवितुःप्रसवे ॥ अश्विनो
र्बाहुभ्यां ॥ पूष्णोहस्ताभ्यां ॥ सरस्वत्यैभैषज्येन ॥ वीर्यायान्नाद्यायाभि
षिँचामि ॥ देवस्यत्वासवितुःप्रसवे ॥ अश्विनोर्बाहुभ्यां ॥ पूष्णोहस्ता

भ्यां ॥ इंद्रस्येंद्रियेण ॥ श्रियैयशसेबलायाभिषिंचामि ॥ ५ ॥ उशंत स्त्वाहवामहुआनोअग्नेसुकेतुना ॥ त्वꣳसोममहेभगंत्वꣳसोमप्रचिकि तोमनीषा ॥ त्वयाहिनःपितरःसोमपूर्वेत्वꣳसोमपितृभिःसंविदानः ॥ बर्हिषदःपितरआहंपितॄन् ॥ उपहूताःपितरोग्निष्वात्ताःपितरः ॥ अग्नि ष्वात्तानृतुमतोहवामहे ॥ नराशꣳसेसोमपीथंयआशुः ॥ तेनोअवंतः सुहवाभवंतु ॥ शंनोभवंतुद्विपदेशंचतुष्पदे ॥ येअग्निष्वात्तायेनाग्निष्वा त्ताः ॥ अꣳहोसुचःपितरःसोम्यासः ॥ परेवरेभृतासोभवंतः ॥ अधि ब्रुवंतुतेअवंत्वस्मान् ॥ वान्यायैदुग्धेजुषमाणाःकरंभं ॥ उदीराणाअवरे परेच ॥ अग्निष्वात्ताऋतुभिःसंविदानाः ॥ इंद्रवंतोहविरिदंजुषंतां ॥ यदग्नेकव्यवाहनत्वमग्नईडितोजातवेदः ॥ मातलीकव्यैः ॥ येतातृपु र्देवत्राजेहमानाः ॥ होत्रावृधस्तोमतष्टासोअर्कैः ॥ आग्नेयाहिसुविदत्रे

भिरर्वाङ् ॥ सत्यैःकव्यैःपितृभिर्घर्मसद्भिः ॥ हव्यवाहमजरंपुरुप्रियं ॥
अग्निंघृतेनहविषासपर्यन् ॥ उपासदंकव्यवाहंपितॄणां ॥ सनःप्रजांवीर
वतीꣳसमृण्वतु ॥ ६ ॥ अषाढंयुत्सुपृतनासुपप्रिं ॥ सुवर्षामप्स्वांवृज
नंस्यगोपां ॥ भरेषुजाꣳसुक्षितिꣳसुश्रवसं ॥ जयंतंत्वामनुमदेमसोम ॥
तिष्ठाहरीरथआयुज्यमानायाहि ॥ वायुर्ननियुतोनोअच्छ ॥ पिबास्यंधो
अभिसृष्टोअस्मे ॥ इंद्रस्वाहारिरिमातेमदाय ॥ कस्यवृषासुतेसचा ॥
नियुत्वान्वृषभोरणत् ॥ वृत्रहासोमपीतये ॥ इंद्रंवयंमहाधने ॥ इंद्रम
भैहवामहे ॥ युजंवृत्रेषुवाज्रिणं ॥ द्वितायोवृत्रहंतमः ॥ विदइंद्रःशत
क्रतुः ॥ उपनोहारिभिःसुतं ॥ ससूरआजनयन्ज्योतिरिंद्र ॥ अयाधि
यातरणिरद्रिबर्हाः ॥ ऋतेनशुष्मीनवमानोअर्कैः ॥ व्युस्रियोअस्रोअ
द्रिर्बिभेद ॥ उतत्यदाश्वश्विया ॥ यदिंद्रनाहुषीष्वा ॥ अग्नेविक्षुप्रतीद

यत् ॥ भरेष्विंद्रꣳसुहवꣳहवामहे ॥ अꣳहोमुचꣳसुकृतंदैव्यंजनं ॥
अग्निंमित्रंवरुणꣳसातयेभगं ॥ द्यावापृथिवीमरुतःस्वस्तये ॥ महिक्षेत्रं
पुरुश्चंद्रंविविद्वान् ॥ आदित्सखिभ्यश्चरथꣳसमैरत् ॥ इंद्रोनृभिरजनद्
दीद्यानःसाकं ॥ सूर्यंमुषसंगातुमग्निं ॥ उरुंनोलोकमनुनेषिविद्वान् ॥
सुवर्वज्योतिरभयꣳस्वस्ति ॥ ऋष्वातइंद्रस्थविरस्यबाहू ॥ उपस्थेयाम
शरणाबृहंता ॥ आनोविश्वाभिरूतिभिःसजोषाः ॥ ब्रह्मजुषाणोहर्यश्व
याहि ॥ वरीवृजत्स्थविरेभिःसुशिप्र ॥ अस्मेदधद्वृषणꣳशुष्मामिंद्र ॥
इंद्रायगावआशिरं ॥ दुदुह्रेवज्रिणेमधु ॥ यत्सीमुपह्वरेविदत् ॥ तास्ते
वज्रिन्धेनवोजोजयुर्नः ॥ गभस्तयोनियुतोविश्ववाराः ॥ अहरहर्भूयइज्जो
गुवानाः ॥ पूर्णाइंद्रक्षुमतोभोजनस्य ॥ इमांतेधियंप्रभरेमहोमहीं ॥
अस्यस्तोत्रेधिषणायत्तआनजे ॥ तमुत्सवेचप्रसवेचसासहिं ॥ इंद्रंदेवा

सः शवसामदन्ननु ॥ ७ ॥ येनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्य
विद्वान् ॥ तेनब्रह्माणोवपतेदमस्योजेमꣳरन्त्यावर्चमासꣳसृजाथ ॥
आनोनियुद्भिःशतिनीभिरध्वरꣳसहस्रिणीभिरुपयाहियज्ञं ॥ वायोअ
स्मिन्हविषिमादयस्वयूयंपातस्वस्तिभिःसदानः ॥ रय्रीणांपतिंयजतंवृ
हंतं ॥ अस्मिन्भरेनृतमंवाजसातौ ॥ प्रजापतिंप्रथमजामृतस्य ॥ यजा
मदेवमधिनोब्रवीतु ॥ प्रजापतेत्वंनिधिपाःपुराणः ॥ देवानांपिताजनि
ताप्रजानां ॥ पतिर्विश्वस्यजगतःपरस्पाः ॥ हविर्नोदेवविहवेजुषस्व ॥
तवेमेलोकाःप्रदिशोदिशश्च ॥ परावतोनिवतउद्वतश्च ॥ प्रजापतेविश्व
सृज्जीवधन्यइदंनोदेव ॥ प्रतिहर्यहव्यं ॥ प्रजापतिंप्रथमंयज्ञियानां ॥
देवानामग्रेयजतंयजध्वं ॥ सनोददातुद्रविणꣳसुवीर्यं ॥ रायस्पोषंविष्य
तुनाभिमस्मे ॥ योरायईशेशतदायउक्थः ॥ यःपशूनाꣳरक्षितावीष्टि

तानां ॥ प्रजापतिःप्रथमजाऋतस्य ॥ सहस्रधामाजुषताऽहविर्नः ॥
प्रवःशुक्रायभानवेभरध्वं ॥ हव्यंमतिंचाग्नयेसुपूतं ॥ योदैव्यानिमानु
षाजनूऽषि ॥ अंतर्विश्वानिविद्मनाजिगाति ॥ अच्छागिरोमतयोदेव
यंतीः ॥ अग्निंयंतिद्रविणंभिक्षमाणाः ॥ सुसंदृशऽसुप्रतीकऽस्वंचं ॥
हव्यवाहमरतिंमानुषाणां ॥ अग्नेत्वमस्मद्युयोध्यमीवाः ॥ अनाग्नित्राअ
भ्यमंतकृष्टीः ॥ पुनरस्मभ्यऽसुवितायदेव ॥ क्षांविश्वेभिरजरेभिर्यजत्र ॥
प्रकारवोमननावच्यमानाः ॥ देवद्रीचींनयथदेवयंतः ॥ दक्षिणावाड्वा
जिनीप्राच्येति ॥ हविर्भरंत्यग्नयेघृताचीं ॥ बृहस्पतिःप्रथमंजायमानः ॥
महोज्योतिषःपरमेव्योमन् ॥ सप्तास्यस्तुविजातोरवेण ॥ विसप्तरश्मिर
धमत्तमाऽसि ॥ बृहस्पतिःसमजयद्वसूनि ॥ महोव्रजान्गोमतोदेव
एषः ॥ अपःसिषासन्त्सुवरप्रतीत्तः ॥ बृहस्पतिर्हत्यमित्रमर्कैः ॥ ८ ॥

सोमोधेनुꣳसोमोअर्वंतमाशुं ॥ सोमोवीरंकर्मण्यंददातु ॥ सादन्यं विदथ्यꣳसभेयं ॥ पितुःश्रवणंयोददाशदस्मै ॥ त्वमिमाओषधीःसोम विश्वाः ॥ त्वमपोअजनयस्त्वंगाः ॥ त्वमाततंथोर्वंतरिक्षं ॥ त्वंज्योति षावितमोववर्थ ॥ यातेधामानिदिवियापृथिव्यां ॥ यापर्वतेष्वोषधी ष्वप्सु ॥ तेभिर्नोविश्वैःसुमनाअहेडन् ॥ राजन्त्सोमप्रतिहव्यागृभाय ॥ परोमात्रयातनुवावृधानननंतमहित्वमन्वश्नुवंति ॥ उभेतेविद्मरजसीपृथि व्याविष्णोदेवत्वंपरमस्यवित्से ॥ शुचींवोहव्यामरुतःशुचीनां ॥ शुचिꣳ हिनोम्यध्वरꣳशुचिभ्यः ॥ ऋतेनसत्यमृतसापआयन् ॥ शुचिजन्मानः शुचयःपावकाः ॥ आनोविश्वेअस्कोगमंतुदेवाः ॥ मित्रोअर्यमावरुणः सजोषाः ॥ भुवन्यथानोविश्वेवृधासः ॥ करन्त्सुषाहाविथुरन्नशेवः ॥ शन्नोदेवाविश्वदेवाभवंतु ॥ शꣳसरस्वतीसहधीभिरस्तु ॥ तेसौभगं

वीरवद्दोमदमः ॥ दधातनद्रावणंचित्रमस्मे ॥ अग्नेयाहिदूत्यंवारिषेण्यः ॥
देवाँअच्छाब्रह्मकृतागणेन ॥ सरस्वतींमरुतोअश्विनापः ॥ यक्षिदेवा
नरंधेयायविश्वान् ॥ द्यौःपितःपृथिविमातरध्रुक् ॥ अग्नेभ्रातर्वसवो
मृडतानः ॥ विश्वेआदित्याअदितेसजोषाः ॥ अस्मभ्यँशर्मबहुलंवि
यंत ॥ युवंवस्त्राणिपीवसावसाथे ॥ युवोरच्छिद्रामंतवोहसर्गाः ॥ अवा
तिरतमनृतानिविश्वा ॥ ऋतेनमित्रावरुणासचेथे ॥ अयंमित्रोनमस्यः
सुशेवः ॥ राजासुक्षत्रोअजनिष्टवेधाः ॥ तस्यवयँसुमतौयज्ञियस्य ॥
अपिभद्रेसौमनसेस्याम ॥ अनमीवासइडयामदंतः ॥ मितज्मवोवरिम
न्नापृथिव्याः ॥ आदित्यस्यव्रतमुपक्ष्यंतः ॥ वयंमित्रस्यसुमतौस्याम ॥
मित्रंनईँशिम्यागोषुगव्यवत् ॥ स्वाधियोविदथेअप्स्वजीजनन् ॥
अरेजयताँरोदसीपाजसागिरा ॥ पतिंप्रियंयजतंजनुषामवः ॥ महाँ

आदित्योनमसोपसद्यः ॥ यातयजानोगृणतेसुशेवः ॥ तस्माएतत्पन्य
तमायजुष्टं ॥ अग्नौमित्रायहविराजुहोत ॥९॥ इतिद्वितीयाष्टकःसमाप्तः ॥
अपःप्रणयति ॥ श्रद्धावाआपः ॥ श्रद्धामेवारभ्यप्रणीयप्रचरति ॥
अपःप्रणयति ॥ यज्ञोवाआपः ॥ यज्ञमेवारभ्यप्रणीयप्रचरति ॥ अपः
प्रणयति ॥ वज्रोवाआपः ॥ वज्रमेवभ्रातृव्येभ्यःप्रहृत्यप्रणीयप्रचरति ॥
अपःप्रणयति ॥ आपोवैरक्षोघ्नीः ॥ रक्षसामपहत्यै ॥ अपःप्रणयति ॥
आपोवैदेवानांप्रियंधामं ॥ देवानामेवप्रियंधाममप्रणीयप्रचरति ॥ अपः
प्रणयति ॥ आपोवैसर्वादेवताः ॥ देवताएवारभ्यप्रणीयप्रचरति ॥ आपो
वैशांताःशांताभिरेवास्यशुचःशमयति ॥ अमृतंवाआपस्तस्मादद्भिरव
तांतमभिषिंचंति ॥ आशिषमेवैतामाशास्तेपूर्णपात्रे ॥ अंततोनुष्टुभा ॥
चतुष्पद्याएतच्छंदःप्रतिष्ठितंपत्नियैपूर्णपात्रेभवति ॥ अस्मिन्लोकेप्रति

तिष्ठानीति ॥ अस्मिन्नेवलोकेप्रतितिष्ठति ॥ अथोवाग्वाअनुष्टुक् ॥
वाङ्मिथुनं ॥ आपोरेतःप्रजननं ॥ एतस्माद्वैमिथुनाद्द्योतमानस्तनयं
न्वर्षति ॥ रेतःसिंचन् ॥ प्रजाःप्रजनयन् ॥ यद्वैयज्ञस्यब्रह्मणायुज्यते ॥
ब्रह्मणावैतस्यविमोकः ॥ अद्भिःशांतिः ॥ विमुक्तंवाएतर्हियोक्रंब्रह्मणा ॥
आदायैनत्पत्नीसहापउपगृह्णीतेशांत्यै ॥ अंजलौपूर्णपात्रमानयति ॥
रेतएवास्याँप्रजांदधाति ॥ प्रजयाहिमनुष्यःपूर्णः ॥ मुखंविमृष्टे ॥ अव
भृथस्यैवरूपंकृत्वोत्तिष्ठति ॥ १ ॥ अग्निंदूतंवृणीमहेहोतारंविश्ववेदसं ॥
अस्ययज्ञस्यसुक्रतुं ॥ अंजंतित्वामध्वरेदेवयंतः ॥ वनस्पतेमधुनादै
व्येन ॥ यदूर्ध्वस्तिष्ठाद्रविणेहधत्तात् ॥ यद्वाक्षयोमातुरस्याउपस्थे ॥
युवासुवासाःपरिवीतआगात्सउश्रेयान्भवतिजायमानः ॥ तंधीरासःक
वयउन्नयंतिस्वाधियोमनसादेवयंतः ॥ यत्रवेत्थवनस्पतेदेवानांगुह्या

नामानि ॥ तत्रैहव्यानिगामय ॥ याःपुरस्तात्प्रस्रवैत्युपरिष्टात्सर्वत
श्चयाः ॥ ताभीरश्मिपवित्राभिःश्रद्धांयज्ञमारभे ॥ आकूत्यैत्वाकामाय
त्वासमृधेत्वा ॥ पुरोदधेअमृतत्वायजीवसे ॥ आकूतिमस्यावसे ॥ कामं
मस्यसमृद्धै ॥ इंद्रस्ययुंजतेधियः ॥ आकूतिंदेवींमनसःपुरोदधे ॥
यज्ञस्यमातासुहवामेअस्तु ॥ यदिच्छामिमनसासकामः ॥ विदेयमेन
हृदयेनिविष्टं ॥ २ ॥ अग्नेव्रतपतेव्रतंचरिष्यामि ॥ तच्छकेयंतन्मे
राध्यतां ॥ वायोव्रतपतेव्रतंचरिष्यामि ॥ तच्छकेयंतन्मेराध्यतां ॥
आदित्यव्रतपतेव्रतंचरिष्यामि ॥ तच्छकेयंतन्मेराध्यतां ॥ व्रतानांव्रत
पतेव्रतंचरिष्यामि ॥ तच्छकेयंतन्मेराध्यतां ॥ अग्नेव्रतपतेव्रतमचा
रिषं ॥ तदशकंतन्मेराधि ॥ वायोव्रतपतेव्रतमचारिषं ॥ तदशकंतन्मे
राधि ॥ आदित्यव्रतपतेव्रतमचारिषं ॥ तदशकंतन्मेराधि ॥ व्रतानां

व्रतपतेव्रतमचारिषं ॥ तदशकंतन्मेराधि ॥ सकृदाच्छिन्नंबर्हिरूर्णा
मृदु ॥ स्योनंपितृभ्यस्त्वाभराम्यहं ॥ अस्मिन्त्सीदंतुमेपितरःसोम्याः ॥
पितामहाःप्रपितामहाश्चानुगैःसह ॥ एकमिषेविष्णुस्त्वान्वेतु ॥ द्वेऊर्जे
विष्णुस्त्वान्वेतु ॥ त्रीणिव्रतायविष्णुस्त्वान्वेतु ॥ चत्वारिमायोभवाय
विष्णुस्त्वान्वेतु ॥ पंचपशुभ्योविष्णुस्त्वान्वेतु ॥ षडृतवेविष्णु
स्त्वान्वेतु ॥ सप्तसप्तभ्योहोत्राभ्योविष्णुस्त्वान्वेतु ॥ सखायःसप्तपदाअ
भूमसख्यंतेगमेयꣳसख्यात्तेमायोषꣳसख्यान्मेमायोष्ठाः ॥ ३ ॥ यद्वो
देवाअतिपादयानि ॥ वाचाचित्प्रयंतंदेवहेडनं ॥ अरायोअस्माꣳअभि
दुच्छुनायते ॥ अन्यत्रास्मन्मरुतस्तन्निधेतन ॥ ततंमआपस्तदुतायते
पुनः ॥ स्वादिष्ठाधीतिरुचथायशस्यते ॥ अयꣳसमुद्रउतविश्वभेषजः ॥
स्वाहाकृतस्यसमुतृप्णुतर्भुवः ॥ यतइंद्रभयामहेततोनोअभयंकृधि ॥

मघवन्छग्धितवतन्नऊतयेविद्विषोविमृधोजहि ॥ स्वस्तिदाविशस्पतिर्वृ
त्रहाविमृधोवशी ॥ वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंकरः ॥ अनाज्ञातं
यदाज्ञातंयज्ञस्यक्रियतेमिथु ॥ अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथातथं ॥
पुरुषसंमितोयज्ञोयज्ञःपुरुषसंमितः ॥ अग्नेतदस्यकल्पयत्वꣳहिवेत्थ
यथातथं ॥ यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्तासः ॥ अग्नि
ष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवाꣳऋतुशोयजाति ॥ ४ ॥ यद्देवादे
वहेडनं ॥ देवासश्चकृमावयं ॥ आदित्यास्तस्मान्मामुंचत ॥ ऋतस्यर्ते
नमामुत ॥ देवाजीवनकाम्यायत् ॥ वाचानृतमूदिम ॥ अग्निर्मातस्मा
देनसः ॥ गार्हपत्यःप्रमुंचतु ॥ दुरितायानिचकृम ॥ करोतुमामनेनसं ॥
ऋतेनद्यावापृथिवी ॥ ऋतेनत्वꣳसरस्वति ॥ ऋतान्मामुंचताꣳहसः ॥
यदन्यकृतमारिम ॥ सजातशꣳसादुतवाजामिशꣳसात् ॥ ज्यायसःशꣳ

सादुतवाकनीयसः ॥ अनाज्ञातंदेवकृतंयदेनः ॥ तस्मात्त्वमस्माञ्जात वेदोसुमुग्धि ॥ यद्वाचायन्मनसा ॥ बाहुभ्यामूरुभ्यामष्ठीवद्भ्यां ॥ शिश्नै र्यदनृतंचकृमावयं ॥ अग्निर्मातस्मादेनसः ॥ यद्धस्ताभ्यांचकरकिल्बि षाणि ॥ अक्षाणांवसुमुपजिघ्रमानः ॥ दूरेपश्याचराष्ट्रभृच्च ॥ तान्य प्सरसावनुदत्तामृणानि ॥ अदीव्यन्नृणंयदहंचकार ॥ यद्वादास्यन्त्संज गाराजनेभ्यः ॥ अग्निर्मातस्मादेनसः ॥ यन्मयिमातागर्भेसति ॥ एन श्चकारयत्पिता ॥ अग्निर्मातस्मादेनसः ॥ यदापिपेषमातरंपितरं ॥ पुत्रः प्रमुदितोधयन् ॥ अहिꣳसितौपितरौमयातत् ॥ तदग्नेअनृणोभवामि ॥ यदंतरिक्षंपृथिवीमुतद्यां ॥ यन्मातरंपितरंवाजिहिꣳसिम ॥ अग्निर्मात स्मादेनसः ॥ यदाशसानिशसायत्पराशसा ॥ यदेनश्चकृमानूतनंयत्पु राणं ॥ अग्निर्मातस्मादेनसः ॥ अतिक्रामामिदुरितंयदेनः ॥ जहामि

रिप्रंपरमेसधस्थे ॥ यत्रयंतिसुकृतोनापिदुष्कृतः ॥ तमारोहामिसुकृतां
नुलोकं ॥ त्रितेदेवाअमृजतैतदेनः ॥ त्रितएतन्मनुष्येषुमामृजे ॥ ततो
मायदिकिंचिदानशे ॥ अग्निर्मातस्मादेनसः ॥ गार्हपत्यःप्रमुंचतु ॥
दुरितायानिचकृम ॥ करोतुमामनेनसे ॥ दिविजाताअप्सुजाताः ॥
याजाताओषधीभ्यः ॥ अथोयाअग्निजाआपः ॥ तानःशुंधंतुशुंधनीः ॥
यदापोनक्तंदुरितंचराम ॥ यद्वादिवानूतनंयत्पुराणं ॥ हिरण्यवर्णास्तत
उत्पुनीतनः ॥ इमंमेवरुणतत्त्वायामि ॥ त्वन्नोअग्नेसत्वन्नोअग्ने ॥ त्वम
ग्नेअयासि ॥ ५ ॥ इदमूनुश्रेयोवसानमागन्मयद्रोजिह्वनजिदश्वजिद्यत् ॥
पर्णवनस्पतेरिवाभिनःशीयताꣳरयिःसचतांनःशचीपतिः ॥ सांग्रहण्ये
ष्ट्यांयजते ॥ इमांजनतासंगृह्णानीति ॥ द्वादशारत्नीरशनाभवति ॥
द्वादशमासाःसंवत्सरः ॥ संवत्सरमेवावरुंधे ॥ मौंजीभवति ॥ ऊर्ग्वै

मुंजाः ॥ ऊर्जमेवावरुंधे ॥ चित्रानक्षत्रंभवति ॥ चित्रंवाएतत्कर्म ॥ यद श्वमेधःसमृद्ध्यै ॥ पुण्यंनामदेवयजनमध्यवस्यति ॥ पुण्यामेवतेनकीर्तिं मभिजयति ॥ अपदातीनृत्विजःसमावहंत्यासुब्रह्मण्यायाः ॥ सुवर्गस्य लोकस्यसमष्ट्यै ॥ केशश्मश्रुवपते ॥ नखानिनिकृंतते ॥ दृतोधावते ॥ स्नाति ॥ अहतंवासःपरिधत्ते ॥ पाप्मनोपहत्यै ॥ वाचंयत्वोपवसति ॥ सुवर्गस्यलोकस्यगुप्त्यै ॥ रात्रिंजागरयंतआसते ॥ सुवर्गस्यलोकस्यस मष्ट्यै ॥ ६ ॥ पूर्णाहुतिमुत्तमांजुहोति ॥ सर्ववैपूर्णाहुतिः ॥ सर्वमेवा प्नोति ॥ अथोइयंवैपूर्णाहुतिः ॥ अस्यामेवप्रतितिष्ठति ॥ पूर्णाहुतिमु त्तमांजुहोति ॥ प्रत्युत्तब्ध्यैसयत्वाय ॥ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसी जायतामित्याह ॥ ब्राह्मणएवब्रह्मवर्चसंदधाति ॥ तस्मात्पुराब्राह्मणो ब्रह्मवर्चस्यजायत ॥ आस्मिन्राष्ट्रेराजन्यइषव्यःशूरोमहारथोजायतामि

त्याह ॥ राजन्यएवशौर्यंमहिमानंदधाति ॥ तस्मात्पुराराजन्यइपत्न्यः
शूरोमहारथोजायत ॥ दोग्ध्रीधेनुरित्याह ॥ धेन्वामेवपयोदधाति ॥
तस्मात्पुरादोग्ध्रीधेनुरजायत ॥ वोढानड्वानित्याह ॥ अनड्वुह्येववीर्यंदधाति ॥ तस्मात्पुरावोढानड्वानजायत ॥ आयुःसप्तिरित्याह ॥ अश्वएवजवंदधाति ॥ तस्मात्पुराशुरश्वोजायत ॥ पुरंधिर्योषेत्याह ॥ योषित्येवरूपंदधाति ॥ तस्मात्स्त्रीयुवतिःप्रियाभावुका ॥ जिष्णूरथेष्ठाइत्याह ॥ आहुर्वैतत्रजिष्णूरथेष्ठाजायते ॥ यत्रैतेनयज्ञेनयजंते ॥ सभेयोयुवेत्याह ॥ योवैपूर्ववयसी ॥ ससभेयोयुवा ॥ तस्माद्युवापुमान्प्रियो भावुकः ॥ आस्ययजमानस्यवीरोजायतामित्याह ॥ आहुर्वैतत्रयजमानस्यवीरोजायते ॥ यत्रैतेनयज्ञेनयजंते ॥ निकामेनिकामेनःपर्जन्यो वर्षत्वित्याह ॥ निकामेनिकामेहुर्वैतत्रपर्जन्योवर्षति ॥ यत्रैतेनयज्ञेनय

जंते ॥ फलिन्योनओषधयःपच्यंतामित्याह ॥ फलिन्योहवैतत्रौषधयः पच्यंते ॥ यत्रैतेनयज्ञेनयजंते ॥ योगक्षेमोनःकल्पतामित्याह ॥ कल्पंतेहवैतत्रप्रजाभ्योयोगक्षेमः ॥ यत्रैतेनयज्ञेनयजंते ॥ ७ ॥ सर्वेषुवा एषुलोकेषुमृत्यवोन्वायत्ताः ॥ तेभ्योयदाहुतीर्नजुहुयात् ॥ लोकेलोक एनंमृत्युर्विंदेत् ॥ मृत्यवेस्वाहामृत्यवेस्वाहेत्यभिपूर्वमाहुतीर्जुहोति ॥ लोकाल्लोकादेवमृत्युमवयजते ॥ नैनंलोकेलोकेमृत्युर्विंदति ॥ यदमुष्मै स्वाहामुष्मैस्वाहेतिजुहुत्संचक्षीत ॥ बहुंमृत्युमस्मित्रंकुर्वीत ॥ मृत्यवे स्वाहेत्येकस्माएवैकांजुहुयात् ॥ एकोवाअमुष्मिन्लोकेमृत्युः ॥ अशन यामृत्युरेव ॥ तमेवामुष्मिन्लोकेवयजते ॥ भ्रूणहत्यायैस्वाहेत्यवभृथ आहुतिंजुहोति ॥ भ्रूणहत्यामेवावयजते ॥ तदाहुः ॥ यद्भ्रूणहत्यापा त्र्याथं ॥ कस्मांद्यज्ञोपिक्रियतइति ॥ अमृत्युर्वाअन्योभ्रूणहत्यायाइत्याहुः ॥

भ्रूणहत्यावावमृत्युरिति ॥ यद्भ्रूणहत्यायैस्वाहेत्यवभृथआहुतिंजुहोति ॥
मृत्युमेवाहुत्यातर्पयित्वापरिपाणंकृत्वा ॥ भ्रूणघ्नेभेषजंकरोति ॥ एताꣳ
हवैमुंडिभऔदन्यवः ॥ भ्रूणहत्यायैप्रायश्चित्तिंविदांचकार ॥ योहास्या
पिप्रजायांब्राह्मणꣳहंति ॥ सर्वंसैतत्सौभेषजंकरोति ॥ जुंबकायस्वाहे
त्यवभृथउत्तमामाहुतिंजुहोति ॥ वरुणोवैजुंबकः ॥ अंततएववरुणमव
यजते ॥ खलुतैवैक्लिधस्यशुक्लस्यपिंगाक्षस्यमूर्धजुहोति ॥ एतद्वैवरुण
स्यरूपं ॥ रूपेणैववरुणमवयजते ॥ ८ ॥ जातवेदायदिवापावकोसि ॥
वैश्वानरोयदिवावैद्युतोसि ॥ शंप्रजाभ्योयजमानायलोकं ॥ ऊर्जंपुष्टिं
ददद्भ्यावावृत्स्व ॥ अपमृत्युमपक्षुधं ॥ अपेतःशपथंजहि ॥ अधानो
अन्नआवह ॥ रायस्पोषꣳसहस्विणं ॥ अग्निमैवाचिश्रितः ॥ वाग्घृ
दये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ वायुमैप्राणेश्रितः ॥

प्राणोहृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ सूर्योमे चक्षुषिश्रितः ॥ चक्षुर्हृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ चंद्रमामेमनसिश्रितः ॥ मनोहृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ दिशोमेश्रोत्रेश्रिताः ॥ श्रोत्रꣳहृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ आपोमेरेतसिश्रिताः ॥ रेतोहृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ पृथिवीमेशरीरेश्रिता ॥ शरीरꣳहृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ ओषधिवनस्पतयोमे लोमसुश्रिताः ॥ लोमानिहृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ इंद्रोमेबलेश्रितः ॥ बलꣳहृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ पर्जन्योमेमूर्धिश्रितः ॥ मूर्धाहृदये ॥ हृदयंमयि ॥ अहममृते ॥ अमृतंब्रह्मणि ॥ ईशानोमेमन्योश्रितः ॥ मन्युर्हृदये ॥ हृदयंमयि ॥

अहममृतेऽमृतंब्रह्मणि ॥ आत्मामेआत्मनिश्रितः ॥ आत्माहृदयेऽहृदयंमयि ॥ अहममृतेऽमृतंब्रह्मणि ॥ पुनर्मआत्मापुनरायुरागात् ॥ पुनःप्राणःपुनराकूतमागात् ॥ वैश्वानरोरश्मिभिर्वावृधानः ॥ अंतस्तिष्ठत्वमृतस्यगोपाः ॥ ९ ॥ त्वमग्नेरुद्रोअसुरोमहोदिवः ॥ त्वंशर्धोमारुतंपृक्षईशिषे ॥ त्वंवातैररुणैर्यासिशंगयः ॥ त्वंपूषाविधतःपासिनुत्मना ॥ देवादेवेषुश्रयध्वं ॥ प्रथमाद्वितीयेषुश्रयध्वं ॥ द्वितीयास्तृतीयेषुश्रयध्वं ॥ तृतीयाश्चतुर्थेषुश्रयध्वं ॥ चतुर्थाःपंचमेषुश्रयध्वं ॥ पंचमाःषष्ठेषुश्रयध्वं ॥ षष्ठाःसप्तमेषुश्रयध्वं ॥ सप्तमाअष्टमेषुश्रयध्वं ॥ अष्टमानवमेषुश्रयध्वं ॥ नवमादशमेषुश्रयध्वं ॥ दशमाएकादशेषुश्रयध्वं ॥ एकादशाद्वादशेषुश्रयध्वं ॥ द्वादशास्त्रयोदशेषुश्रयध्वं ॥ त्रयोदशाश्चतुर्दशेषुश्रयध्वं ॥ चतुर्दशाःपंचदशेषुश्रयध्वं ॥ पंचदशाःषोडशेषुश्रयध्वं ॥

षोडशाः सप्तदशेषु श्रयध्वं ॥ सप्तदशाऽअष्टादशेषु श्रयध्वं ॥ अष्टादशा
एकान्नविꣳशेषु श्रयध्वं ॥ एकान्नविꣳशाविꣳशेषु श्रयध्वं ॥ विꣳ
शाएकविꣳशेषु श्रयध्वं ॥ एकविꣳशाद्द्वाविꣳशेषु श्रयध्वं ॥ द्द्वाविꣳ
शास्त्रयोविꣳशेषु श्रयध्वं ॥ त्रयोविꣳशाश्चतुर्विꣳशेषु श्रयध्वं ॥ चतुर्विꣳ
शाः पञ्चविꣳशेषु श्रयध्वं ॥ पञ्चविꣳशाः षड्विꣳशेषु श्रयध्वं ॥ षड्विꣳ
शाः सप्तविꣳशेषु श्रयध्वं ॥ सप्तविꣳशाऽअष्टाविꣳशेषु श्रयध्वं ॥ अष्टा
विꣳशाएकान्नत्रिꣳशेषु श्रयध्वं ॥ एकान्नत्रिꣳशास्त्रिꣳशेषु श्रयध्वं ॥
त्रिꣳशाएकत्रिꣳशेषु श्रयध्वं ॥ एकत्रिꣳशाद्द्वात्रिꣳशेषु श्रयध्वं ॥ द्द्वात्रिꣳ
स्त्रयस्त्रिꣳशेषु श्रयध्वं ॥ देवाꣳस्त्रिरेकादशास्त्रिस्त्रयस्त्रिꣳशाः ॥ उत्तरे
भवत ॥ उत्तरवर्मानउत्तरसत्वानः ॥ यत्कामइदंजुहोमि ॥ तन्मेस
मृध्यतां ॥ वयꣳस्यामपतयोरयीणां ॥ भूर्भुवःस्वःस्वाहा ॥ १० ॥

चरणंपवित्रंविततंपुराणं ॥ येनपूतस्तरतिदुष्कृतानि ॥ तेनपवित्रेण
शुद्धेनपूताः ॥ अतिपाप्मानमरातिंतरेम ॥ लोकस्यद्वारमर्चिमत्पवित्रं ॥
ज्योतिष्मद्राजमानंमहस्वत् ॥ अमृतस्यधारावहुधादोहमानं ॥ चरणं
नोलोकेसुधितांदधातु ॥ अग्निर्मूर्धाभुवः ॥ अनुनोद्यानुमतिरन्विदनु
मतेत्वं ॥ हव्यवाहꣳस्विष्टं ॥ ११ ॥ ऋचांप्राचीमहतीदिगुच्यते ॥
दक्षिणामाहुर्यजुषामपारां ॥ अथर्वणामंगिरसांप्रतीचीं ॥ साम्नामुदीं
चीमहतीदिगुच्यते ॥ ऋग्भिःपूर्वाह्णेदिविदेवईयते ॥ यजुर्वेदेतिष्ठति
मध्येअह्नः ॥ सामवेदेनास्तमयेमहीयते ॥ वेदैरशून्यस्त्रिभिरेतिसूर्यः ॥
ऋग्भ्योजाताꣳसर्वशोमूर्तिमाहुः ॥ सर्वागतिर्यजुषीहवशश्वत् ॥
सर्वतेजःसामरूप्यꣳहशश्वत् ॥ सर्वꣳहेदंब्रह्मणाहवसृष्टं ॥ ऋग्भ्यो
जातंवैश्यंवर्णमाहुः ॥ यजुर्वेदंक्षत्रियस्याहुर्योनिं ॥ सामवेदोब्राह्मणानां

प्रसूतिः ॥ पूर्वेपूर्वेभ्योवचएतदूचुः ॥ आदुर्शमग्निंचिन्वानाः ॥ पूर्वे
विश्वसृजोमृताः ॥ शतंवर्षसहस्राणि ॥ दीक्षिताःसत्रमासत ॥ तपआसी
द्बृहपतिः ॥ ब्रह्मब्रह्माभवत्स्वयं ॥ सत्यꣳहहोतैषामासीत् ॥ यद्विश्व
सृजआसत ॥ अमृतमेभ्यउदगायत् ॥ सहस्रंपरिवत्सरान् ॥ भूतꣳह
प्रस्तोतैषामासीत् ॥ भविष्यत्प्रतिचाहरत् ॥ प्राणोअध्वर्युरभवत् ॥
इदꣳसर्वꣳसिषासतां ॥ अपानोविद्धानावृतः ॥ प्रतिप्रातिष्ठदध्वरे ॥
आर्तवाउपगातारः ॥ सदुस्याऋतवोभवन् ॥ अर्धमासाश्चमासाश्च ॥
चमसाध्वर्यवोभवन् ॥ अशꣳसद्ब्रह्मणस्तेजः ॥ अच्छावाकोभवद्यशाः॥
ऋतमेषांप्रशास्तासीत् ॥ यद्विश्वसृजआसत ॥ ऊर्ग्जानमुदवहत् ॥
ध्रुवगोपःसहोभवत् ॥ ओजोभ्यष्ट्रौद्रावृणः ॥ यद्विश्वसृजआसत ॥
अपचितिःपोत्रीयमयजत् ॥ नेष्ट्रीयमयजत्त्विषिः ॥ आग्नीध्राद्विदुषी

सत्यं ॥ श्रद्धाहैवायजत्स्वयं ॥ इरापत्नीविश्वसृजां ॥ आकूतिरपिन
ह्वविः ॥ इध्मꣳहक्षुच्चैभ्यउग्रे ॥ तृष्णाचावहतामुभे ॥ वागेषाऽसुम्न
ह्मण्यासीत् ॥ छंदोयोगान्विजानती ॥ कल्पतंत्राणितन्वानाहः ॥ सꣳ
स्थाश्चसर्वशः ॥ अहोरात्रेपशुपाल्यौ ॥ मुहूर्ताःप्रेष्याअभवन् ॥ मृत्यु
स्तदंभवद्धाता ॥ शमितोग्रोविशांपतिः॥ विश्वसृजःप्रथमाःसत्रमासत ॥
सहस्रसमंप्रसुतेनयंतः ॥ ततोहजज्ञेभुवनस्यगोपाः ॥ हिरण्मयःशकु
निर्ब्रह्मनामं ॥ येनसूर्यस्तपतितेजसेद्धः ॥ पितापुत्रेणपितृमान्योनि
योनौ ॥ नावेदविन्मनुतेतंबृहंतं ॥ सर्वानुभुमात्मानꣳसंपराये ॥ एष
नित्योमहिमाब्राह्मणस्य ॥ नकर्मणावर्धतेनोकनीयान् ॥ तस्यैवात्मापं
दवित्तंविदित्वा ॥ नकर्मणालिप्यतेपापकेन ॥ पंचपंचाशतंस्रिवृतःसं
वत्सराः ॥ पंचपंचाशतःपंचदशाः ॥ पंचपंचाशतःसप्तदशाः ॥ पंच

पंचाशतएकविꣳशाः ॥ विश्वसृजाꣳसहस्रसंवत्सरं ॥ एतेनवैविश्वसृ
जइदंविश्वमसृजंत ॥ यद्विश्वमसृजंत ॥ तस्माद्विश्वसृजः ॥ विश्वमेनान
नुप्रजायते ॥ ब्रह्मणःसायुज्यꣳसलोकतांयंति ॥ एतासामेवदेवतानाꣳ
सायुज्यं ॥ सार्ष्टिताꣳसमानलोकतांयंति ॥ यएतदुपयंति ॥ येचैन
त्प्राहुः ॥ येभ्यश्चैनत्प्राहुः ॥ ११ ॥ इतिब्राह्मणतृतीयाष्टकसमाप्तः ॥

अथअरण(उपनिषत्)प्रारंभः॥ पवित्रवंतःपरिवाजमासते॥ पितैषां
प्रत्नोअभिरक्षतिव्रतं ॥ महःसमुद्रंवरुणस्तिरोदधे ॥ धीराइच्छेकुर्धरु
णेष्वारभं ॥ पवित्रंतेवितंतंब्रह्मणस्पते ॥ प्रभुर्गात्राणिपर्येषिविश्वतः ॥
अतप्ततनूर्नतदामोअश्नुते ॥ शृतासइद्वहंतःस्तत्समाशत ॥ अथवा
योरेकादशपुरुषस्यैकादशस्त्रीकस्य ॥ प्रभ्राजमानानाꣳरुद्राणाꣳस्थाने
स्वतेजसाभानि ॥ व्यवदातानाꣳरुद्राणाꣳस्थानेस्वतेजसाभानि ॥

वासुकिवैद्युताना॰रुद्राणा॰स्थानेस्वतेजसाभ्रानि ॥ रजताना॰रुद्राणा
॰स्थानेस्वतेजसाभ्रानि ॥ परुषाणा॰रुद्राणा॰स्थानेस्वतेजसाभ्रानि ॥
श्यामाना॰रुद्राणा॰स्थानेस्वतेजसाभ्रानि ॥ कपिलाना॰रुद्राणा॰
स्थानेस्वतेजसाभ्रानि ॥ अतिलोहिताना॰रुद्राणा॰स्थानेस्वतेजसा-
भ्रानि ॥ ऊर्ध्वाना॰रुद्राणा॰स्थानेस्वतेजसाभ्रानि ॥ अवपतंताना॰
रुद्राणा॰स्थानेस्वतेजसाभ्रानि ॥ वैद्युताना॰रुद्राणा॰स्थानेस्वतेजसा
भ्रानि ॥ प्रभ्राजमानीना॰रुद्राणीना॰स्थानेस्वतेजसाभ्रानि ॥ व्यव
दातीना॰रुद्राणीना॰स्थानेस्वतेजसाभ्रानि ॥ वासुकिवैद्युतीना॰रुद्रा
णीना॰स्थानेस्वतेजसाभ्रानि ॥ रजताना॰रुद्राणीना॰स्थानेस्वतेज
साभ्रानि ॥ परुषाणा॰रुद्राणीना॰स्थानेस्वतेजसाभ्रानि ॥ श्यामाना
॰रुद्राणीना॰स्थानेस्वतेजसाभ्रानि ॥ कपिलाना॰रुद्राणीना॰स्थाने

स्वतेजसाभ्रानि ॥ अतिलोहितीना ँरुद्राणीना ँस्थानेस्वतेजसाभ्रानि॥ ऊर्ध्वाना ँरुद्राणीना ँस्थानेस्वतेजसाभ्रानि ॥ अवपतंतीना ँरुद्राणीना ँस्थानेस्वतेजसाभ्रानि ॥ वैद्युतीना ँरुद्राणीना ँस्थानेस्वतेजसाभ्रानि ॥ ॐभूर्भुवःस्वः ॥ रूपाणिवोमिथुनंमानोमिथुन ँरीढ्वं ॥ १ ॥ अथाग्नेरष्टपुरुषस्य ॥ अग्नेःपूर्वदिश्यस्यस्थानेस्वतेजसाभ्रानि ॥ जातवेदसउपदिश्यस्यस्थानेस्वतेजसाभ्रानि ॥ सहोजसोदक्षिणदिश्यस्यस्थानेस्वतेजसाभ्रानि ॥ अजिराप्रभवउपदिश्यस्यस्थानेस्वतेजसाभ्रानि ॥ वैश्वानरस्यापरदिश्यस्यस्थानेस्वतेजसाभ्रानि ॥ नर्यापसउपदिश्यस्यस्थानेस्वतेजसाभ्रानि॥ पंक्तिराधसउदग्दिश्यस्यस्थानेस्वतेजसाभ्रानि ॥ ॐभूर्भुवःस्वः ॥ दिविसर्पिणउपदिश्यस्यस्थानेस्वतेजसाभ्रानि ॥ ॐभूर्भुवःस्वः ॥ दिशोवोमिथुनंमानोमिथुन ँरीढ्वं ॥ योवैतांब्रह्मणोवेद ॥ अमृतेनावृ

तांपुरी ॥ तस्मैब्रह्मचब्रह्माच ॥ आयुःकीर्तिंप्रजांददुः ॥ उत्तिष्ठब्रह्म
णस्पते ॥ देवयंतस्त्वेमहे ॥ उपप्रयंतुमरुतःसुदानवः ॥ इंद्रप्राशृभे
वासचा ॥ २ ॥ सहवैदेवानांचासुराणांच यज्ञौप्रततावास्तांवय२स्वर्गं
लोकमेष्यामोवयमेष्यामइतितेसुराःसंनह्यसहसैवाचरन्ब्रह्मचर्येणतपसे
वदेवास्तेसुराअमुह्य२स्तेनप्राजान२स्तेपराभवंतेनस्वर्गंलोकमायन्प्रस्तृ
तेनवैयज्ञेनदेवाःस्वर्गंलोकमायंन्नप्रस्तृतेनासुरान्पराभावयन्प्रस्तृतोहवैयज्ञो
पवीतिनोयज्ञोप्रसृतोनुपवीतिनोयत्किंचब्राह्मणोयज्ञोपवीत्यधीतेयजत
एवतत्तस्माद्यज्ञोपवीत्येवाधीयीतयाजयेद्यजेतवायज्ञस्यप्रस्तृत्याअजिनं
वासोवादक्षिणतउपवीयदक्षिणंबाहुमुद्धरतेवधत्तेसव्यमितियज्ञोपवीत
मेतदेवविपरीतंप्राचीनावीत२संवीतंमानुषं ॥ ३ ॥ यद्देवादेवहेळनंदेवा
सश्चकृमावयं ॥ आदित्यास्तस्मान्मामुंचतर्तस्यर्तेनमामित ॥ देवाजी

वनकाम्यायद्वाचानृतमूदिम ॥ तस्मान्नइहमुंचतविश्वेदेवाःसजोषसः ॥
ऋतेनद्यावापृथिवीऋतेनत्व ँसरस्वति ॥ कृतान्नःपाह्येनसोयत्किंचानृ
तमूदिम ॥ इंद्राग्नीमित्रावरुणौसोमोधाताबृहस्पतिः ॥ तेनोमुंचंत्वेनसो
यदन्यकृतमारिम ॥ सजातश ँसादुतजामिश ँसाज्यायसःश ँसादुत
वाकनीयसः ॥ अनाधृष्टंदेवकृतंयदेनस्तस्मात्त्वमस्मान्जातवेदोमुमुग्धि ॥
यद्वाचायन्मनसाबाहुभ्यामूरुभ्यामष्ठीवद्भ्या ँशिश्नैर्यदनृतंचकृमावयं ॥
अग्निर्मातस्मादेनसःप्रमुंचतुचकृमयानिदुष्कृता ॥ येनत्रितोअर्णवान्निर्ब
भूवयेनसूर्यतमसोनिर्मुमोच ॥ येनेंद्रोविश्वाअजहादरातीस्तेनाहंज्योतिषा
ज्योतिरानशानआक्षि ॥ यत्कुसींदमप्रतीत्तंमयेहयेनयमस्यनिधनाचरा
मि ॥ एतत्तदग्नेअनृणोभवामिजीवन्नेवप्रतितत्तेदधामि ॥ यन्मायिमाताय
दापिपेषयदंतरिक्षंयदाशसातिक्रामामित्रितेदेवादिविजाताय दापइममेव

रुणतत्त्वायामित्वंनोअग्नेसत्वंनोअग्नेत्वमग्नेअयासि ॥ ४ ॥ यददीव्यंनृ
णमहंबभूवादित्सन्वासंजगरजनेभ्यः ॥ अग्निर्मातस्मादिंद्रश्चसंविदानौ
प्रमुंचतां ॥ यद्धस्ताभ्यांचकरकिल्बिषाण्यक्षाणांवग्नुमुपजिघ्नमानः ॥
उग्रंपश्याचराष्ट्रभृच्चतान्यप्सरसावनुदत्तामृणानि ॥ उग्रंपश्येराष्ट्रभृत्कि
ल्बिषाणियदक्षवृत्तमनुदत्तमेतत् ॥ नेन्नंऋणानृणवइत्समानोयमस्यलो
केअधिरज्जुराय ॥ अवतेहेळउदुत्तममिममेवरुणतत्त्वायामित्वंनोअग्नेस
त्वंनोअग्ने ॥ संकुसुकोविकुसुकोनिर्ऋथोयश्चनिस्वनः ॥ तेयेस्मद्यक्ष्म
मनागसोदूरादूरमचीचतं ॥ नियैक्ष्ममचीचतकृत्यांनिर्ऋतिंच ॥ तेन
योऽस्मत्समृच्छातैतमस्मैप्रसुवामसि ॥ दुःशꣳसानुशꣳसाभ्यांघृणेनां
नुघृणेनंच ॥ तेनान्योऽस्मत्समृच्छातैतमस्मैप्रसुवामसि ॥ संवर्चसा
पयसासंतनूभिरगन्महिमनसासꣳशिवेन ॥ त्वष्टानोअत्रविदधातुरायो

नुमार्ष्टुतन्वो२यद्विलिष्टं ॥ ५ ॥ आयुष्टेविश्वतोदधदयमग्निर्वरेण्यः ॥
पुनस्तेप्राणआयातिपरायक्ष्मꣳसुवामिते ॥ आयुर्दाअग्नेहविषोजुषाणो
घृतप्रतीकोघृतयोनिरेधि ॥ घृतंपीत्वामधुचारुगव्यंपितेवपुत्रमभिरक्ष
तादिमं ॥ इममग्नआयुषेवर्चसेकृधितिग्ममोजोवरुणसꣳशिशाधि ॥
मातेवास्माअदितेशर्मयच्छविश्वेदेवाजरदष्टिर्यथासत् ॥ अग्नआयूꣳषि
पवसआसुवोर्जमिषंचनः ॥ आरेबाधस्वदुच्छुनां ॥ अग्नेपवस्वस्वपाअ
स्मेवर्चःसुवीर्यं ॥ दधद्रयिंमयिपोषं ॥ अग्निर्ऋषिःपवमानःपांचजन्यः
पुरोहितः ॥ तमीमहेमहागयं ॥ अग्नेजातान्प्रणुदानःसपत्नान्प्रत्यजा
तान्जातवेदोनुदस्व ॥ अस्मेदीदिहिसुमनाअहेळन्छर्मंतेस्यामत्रिवरूथउ
द्भौ ॥ सहसाजातान्प्रणुदानःसपत्नान्प्रत्यजातान्जातवेदोनुदस्व ॥ अधि
नोब्रूहिसुमनस्यमानोवयꣳस्यामप्रणुदानःसपत्नान् ॥ अग्नेयोनोभितोज

नोवृकोवारोजिघा॰सति ॥ ता॰स्त्वंवृत्रहन्जहिवस्वस्मभ्यमाभर ॥ अग्ने
योनोभिदासतिसमानोयश्चनिष्ट्यः ॥ तंत्वय॰समिधैकृत्वातुभ्यमग्नेपिद
धमसि ॥ योनः शपादशपतोयश्चनः शपतः शपात् ॥ उपाश्रुतस्मैनिम्रु
क्चसवैपाप॰समूहतां ॥ योनः सपत्नोयोरणोमतोभिदासतिदेवाः ॥
इध्मस्यैवप्रक्षायतोमातस्योच्छेषिकिंचन ॥ योमाद्वेष्टिजातवेदोयंचाहंद्वे
ष्मियश्चमां ॥ सर्वा॰स्तानग्नेसंदहुया॰श्चाहंद्वेष्मियेचमां ॥ योअस्म
भ्यमरातीयाद्यश्चनोद्वेषतेजनः ॥ निंदाद्योअस्मान्दिप्साच्चसर्वा॰स्तान्म
ष्मषाकुरु ॥ स॰शितंमेब्रह्मस॰शितंवीर्यं३बलं ॥ स॰शितंक्षत्रंमोजि
ष्णुयस्याहमस्मिपुरोहितः ॥ उदेषांबाहूअतिरमुद्वर्चोअथोबलं ॥ क्षिणो
मित्रब्रह्मणामित्रानुन्नयामिस्वां२अहं ॥ पुनर्मनः पुनरायुर्मआगात्पुनश्च
क्षुः पुनः श्रोत्रंमआगात्पुनः प्राणः पुनराकूतंमआगात्पुनश्चित्तंपुनराधीतं

मआगात् ॥ वैश्वानरोमेदब्धस्तनूपाअवबाधतांदुरितानिविश्वा ॥ ६ ॥
वैश्वानरायप्रातिवेदयामोयदीनृणꣳसंगरोदेवतासु ॥ सएतान्पाशान्प्र
मुचन्प्रवेदसनोमुंचातुदुरितादवद्यात् ॥ वैश्वानरःपवयान्नःपवित्रैर्यत्संग
रमभिधावाम्याशां ॥ अनाजानन्मनसायाचमानोयदत्रैनोअवतत्सुवा
मि ॥ अमीयेसुभगेदिविविचृतौनामतारके ॥ प्रेहामृतस्ययच्छतामेतद्व
चक्रमोचनं ॥ विर्जिहीष्वलोकान्कृधिबंधान्मुंचासिबचकं ॥ योनेरि
वप्रच्युतोगर्भःसर्वान्पथोअनुष्व ॥ सप्रजानन्प्रतिगृभ्णीतविद्वान्प्रजा
पतिःप्रथमजाऋतस्य ॥ अस्माभिर्दुत्तंजरसःपरस्तादच्छिन्नंतंतुमनुसंच
रेम ॥ ततंतंतुमन्वेकेअनुसंचरंतियेषांदत्तंपित्र्यमायनवत् ॥ अबंध्वे
केददतःप्रयच्छाद्दातुंचेच्छक्वाꣳसःस्वर्गएषां ॥ आरंभेथामनुसꣳरभे
थासꣳसमानंपंथामवथोघृतेन ॥ यद्वांपूर्तपरिविष्टंयदग्नौतस्मैगोत्रायेह

जायांपतीस२रभेथां ॥ यदुंतरिक्षंपृथिवीमुतद्यांयन्मातरंपितरंवाजिहि
२सिम ॥ अग्निर्मातस्मादेनंसोगार्हपत्यउन्नोनेपदुरितायानिंचकृम ॥
भूमिर्मातादितिर्नोजनित्रंभ्रातांतरिक्षमभिशस्तएनः ॥ द्यौर्नःपितापितृ
याच्छंभवासिजामिमित्वामाविंवित्सिलोकात् ॥ यत्रसुहार्दःसुकृतोमदंति
तेविहायरोगंतन्वा२स्वायां ॥ अश्लोणांगैरहेतांःस्वर्गेतत्रपश्येमपि
तरंचपुत्रं ॥ यदन्नमद्म्यनृतेनदेवादास्यन्नदास्यन्नुतवाकरिष्यन् ॥ यद्देवा
नांचक्षुष्यागोअस्तियदेवकिंचप्रतिजग्राहमग्निर्मातस्मादनृणंकृणोतु ॥
यदन्नमद्मिबहुधाविरूपंवासोहिरण्यमुतगामजामविं ॥ यद्देवानांचक्षु
ष्यागोअस्तियदेवकिंचप्रतिजग्राहमग्निर्मातस्मादनृणंकृणोतु ॥ यन्मया
मनसावाचाकृतमेनःकदाचन ॥ सर्वस्मात्तस्मान्मेळितोसोग्धिवत्व२हि
वेत्थयथातथं ॥ ७ ॥ कूष्मांडैर्जुहुयाद्योपूतइवमन्येतयथास्तेनोयथाभ्रू

णहैवमेषभवतियोयोनौरेतःसिंचतियदर्वाचीनमेनौभ्रूणहत्यायास्तस्मा
न्मुच्यतेयावदेनोदीक्षामुपैतिदीक्षितएतैःसंततिजुहोतिसंवत्सरंदीक्षि
तोभवतिसंवत्सरादेवात्मानंपुनीतेमासंदीक्षितोभवतियोमासःससंवत्स
रःसंवत्सरादेवात्मानंपुनीतेचतुर्विꣳशतिꣳरात्रीर्दीक्षितोभवतिचतुर्वि
ꣳशतिरर्धमासाःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेद्वादशरात्रीर्दीक्षितो
भवतिद्वादशमासाःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेषड्रात्रीर्दीक्षितोभं
वतिषड्वाऋतवःसंवत्सरःसंवत्सरादेवात्मानंपुनीतेतिस्रोरात्रीर्दीक्षितोभं
त्रिपदागायत्रीगायत्रियाएवात्मानंपुनीतेनमाꣳसंश्रीयान्नस्त्रियमु
पेयान्नोपर्यासीतजुगुप्सेतानृतात्पयोब्राह्मणस्यव्रतंयवागूराजन्यस्यामि
क्षावैश्यस्याथोसौम्येप्यध्वरएतद्व्रतंब्रूयाद्यदिमन्येतोपदस्यामीत्योदनंधा
नाःसक्तून्घृतमित्यनुव्रतयेदात्मनोनुपदासाय ॥ ८ ॥ यावतीर्वैदेवता

स्ताःसर्वांवेदान्विदिंब्राह्मणेवसंतितस्माद्ब्राह्मणेभ्योवेदान्विन्द्योदिवेदिंवेनम
स्कुर्यान्नाश्लीलंकीर्तियेदेताएवदेवताःप्रीणाति ॥ चित्तिःस्रुक् ॥ चित्त
माज्यं ॥ वाग्वेदिः ॥ आधीतंबर्हिः ॥ केतोऽग्निः ॥ विज्ञातमग्निः ॥
वाक्पतिर्होता ॥ मनऽउपवक्ता ॥ प्राणोहविः ॥ सामाध्वर्युः ॥ वाच
स्पतेविधेनामन् ॥ विधेमतेनाम ॥ विधेस्त्वमस्माकंनाम ॥ वाचस्प
तिःसोमंपिबतु ॥ आस्मासुनृम्णंधात्स्वाहा ॥ ९ ॥ पृथिवीहोता ॥
द्यौरध्वर्युः ॥ रुद्रोग्नीत् ॥ बृहस्पतिरुपवक्ता ॥ वाचस्पतेवाचोवीर्येण ॥
संभृततमेनायक्ष्यसे ॥ यजमानायवायँ ॥ आसुवस्करंसै ॥ वाचस्प
तिःसोमंपिबति ॥ जजनदिंद्रमिंद्रियायस्वाहा ॥ १० ॥ अग्निर्होता ॥
अश्विनाध्वर्यू ॥ त्वष्टाग्नीत् ॥ मित्रऽउपवक्ता ॥ सोमःसोमस्यपुरोगाः ॥
शुक्रःशुक्रस्यपुरोगाः ॥ श्रातास्तइंद्रसोमाः ॥ वातापेर्हवनश्रुतःस्वाहा

॥ ११ ॥ सूर्यंतेचक्षुः ॥ वातंप्राणः ॥ द्यांपृष्ठं ॥ अंतरिक्षमात्मा ॥ अंगैर्यज्ञं ॥ पृथिवीꣳशरीरैः ॥ वाचस्पतेच्छिद्रयावाचा ॥ अच्छिद्रया जुह्वा ॥ दिविदेवावृधꣳहोत्रामेरयस्वस्वाहा ॥ १२ ॥ महाहविर्होता ॥ सत्यहविरध्वर्युः ॥ अच्युतपाजाअग्नीत् ॥ अच्युतमनाउपवक्ता ॥ अनाधृष्यश्चाप्रतिधृष्यश्चयज्ञस्याभिगरौ ॥ अयास्यउद्गाता ॥ वाचस्पतेहद्विधेनामन् ॥ विधेमतेनाम ॥ विधेस्त्वमस्माकंनाम ॥ वाचस्पतिःसोममपात् ॥ मादैव्यस्तंतुश्छेदिमामनुष्यः ॥ नमोद्दिवे ॥ नमः पृथिव्यैस्वाहा ॥ १३ ॥ वाग्घोता ॥ दीक्षापत्नी ॥ वातोध्वर्युः ॥ आपो भिगरः ॥ मनोहविः ॥ तपसिजुहोमि ॥ भूर्भुवःसुवः ॥ ब्रह्मस्वयंभु ॥ ब्रह्मणेस्वयंभुवेस्वाहा ॥ १४ ॥ ब्राह्मणएकहोता ॥ सयज्ञः ॥ समेद दातुप्रजांपशून्पुष्टिंयशः ॥ यज्ञश्चमेभूयात् ॥ अग्निर्द्विहोता ॥ सभर्ता ॥

समैददातुप्रजांपशून्पुष्टिंयशः ॥ भर्ताचमेभूयात् ॥ पृथिवीत्रिहोता ॥
सप्रतिष्ठा ॥ समैददातु० ॥ प्रतिष्ठाचमेभूयात् ॥ अंतरिक्षंचतुर्होता ॥
सविष्ठाः ॥ समैददातु० ॥ विष्ठाश्चमेभूयात् ॥ वायुःपंचहोता ॥
सप्राणः ॥ समैददातु० ॥ प्राणश्चमेभूयात् ॥ चंद्रमाःषड्होता ॥ सऋ
तून्कल्पयाति ॥ समैददातु० ॥ ऋतवश्चमेकल्पंतां ॥ अन्नꣳसप्तहो
ता ॥ सप्राणस्यप्राणः ॥ समैददातु० ॥ प्राणस्यचमेप्राणोभूयात् ॥
द्यौरष्टहोता ॥ सौनाधृष्यः ॥ समैददातु० ॥ अनाधृष्यश्चभूयासं ॥
आदित्योनवहोता ॥ सतेजस्वी ॥ समैददातु० ॥ तेजस्वीचभूयासं ॥
प्रजापतिर्दशहोता ॥ सइदꣳसर्वं ॥ समैददातु० ॥ सर्वंचमेभूयात्
॥ १५ ॥ अग्निर्यजुर्भिः ॥ सवितास्तोमैः ॥ इंद्रउक्थामदैः ॥ मित्रावरु
णावाशिषा ॥ अंगिरसोधिष्णियेरग्निभिः ॥ मरुतःसदोहविर्धानाभ्यां ॥

आप्रःप्रोक्षणीभिः ॥ ओषधयोबर्हिषा ॥ अदितिर्वेद्या ॥ सोमोदी
क्षया ॥ त्वष्टेध्मेन ॥ विष्णुर्यज्ञेन ॥ वसवआज्येन ॥ आदित्यादाक्षि
णाभिः ॥ विश्वेदेवाऊर्जा ॥ पूषास्वगाकारेण ॥ बृहस्पतिःपुरोधया ॥
प्रजापतिरुद्गीथेन ॥ अंतरिक्षंपवित्रेण ॥ वायुःपात्रैः ॥ अहश्चाध्वर्यो
॥ १६ ॥ सेनेंद्रस्य ॥ धेनाबृहस्पतेः ॥ पथ्यापूष्णः ॥ वाग्वायोः ॥
दीक्षासोमस्य ॥ पृथिव्यग्नेः ॥ वसूनांगायत्री ॥ रुद्राणांत्रिष्टुप् ॥ आदि
त्यानांजगती ॥ विष्णोरनुष्टुप् ॥ वरुणस्यविराट् ॥ यज्ञस्यपंक्तिः ॥ प्रजाप
तेरनुमतिः ॥ मित्रस्यश्रद्धा ॥ सवितुःप्रसूतिः ॥ सूर्यस्यमरीचिः ॥ चंद्रमसो
रोहिणी ॥ ऋषीणामरुंधती ॥ पर्जन्यस्यविद्युत् ॥ चतस्रोदिशः ॥ चतस्रो
वांतरदिशाः ॥ अहश्चरात्रिश्च ॥ कृषिश्चवृष्टिश्च ॥ त्विषिश्चापचितिश्च ॥
आपश्चौषधयश्च ॥ ऊर्क्चसूनृताचदेवानांपत्नयः ॥ १७ ॥ देवस्यत्वा

सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि राजा त्वावरुणो
नयतु देवि दक्षिणेऽग्नये हिरण्यं तेनामृतत्वमश्यां वयो दात्रे मयो मह्यमस्तु प्र
तिगृहीत्रे कद्रुदंकस्मा अदात्कामः कामायकामो दाता कामः प्रतिग्रहीता का
मꣳसमुद्रमाविशकामेनत्वा प्रतिगृह्णामि कामैतत्ते एषा ते काम दक्षिणोत्ता
नस्त्वौगीरसः प्रतिगृह्णातु ॥ १८ ॥ सुवर्णं घर्मं परिवेद वेनं ॥ इंद्रस्यात्मा
नँदशधाचरँतं ॥ अंतः समुद्रे मनसाचरँतं ॥ ब्रह्मान्वविंदद्दशहोतारमर्णं ॥
अंतः प्रविष्टः शास्ताजनानां ॥ एकः सन्बहुधाविचारः ॥ शतꣳशुक्रा
णि यत्रैकं भवँति ॥ सर्वे वेदा यत्रैकं भवँति ॥ सर्वे होतारो यत्रैकं भवँति ॥
समानसीन आत्माजनानां ॥ अंतः प्रविष्टः शास्ताजनानाꣳसर्वात्मा ॥
सर्वाः प्रजा यत्रैकं भवँति ॥ चतुर्होतारो यत्र संपदं गच्छँतिदेवैः ॥ समा
नसीन आत्माजनानां ॥ ब्रह्मेंद्रमग्निं जगतः प्रतिष्ठां ॥ दिव आत्मानꣳस

वितारंबृहस्पतिं ॥ चतुर्होतारंप्रदिशोनुकृप्तं ॥ वाचोवीर्यंतपसान्वविं
दत् ॥ अंतःप्रविष्टंकर्तारमेतं ॥ त्वष्टार॰रूपाणिविकुर्वतंविपश्चिं ॥ अ
मृतस्यप्राणंयज्ञमेतं ॥ चतुर्होतृणामात्मानंकवयोनिचिक्युः ॥ अंतःप्र
विष्टंकर्तारमेतं ॥ देवानांबंधुनिहितंगुहासु ॥ अमृतेनकृप्तंयज्ञमेतं ॥ चतु
र्होतृणामात्मानंकवयोनिचिक्युः ॥ शतंनियुतःपरिवेदविश्वाविश्ववारः ॥
विश्वमिदंवृणाति ॥ इंद्रस्यात्मानिहितःपंचहोता ॥ अमृतंदेवानामायुः
प्रजानां ॥ इंद्र॰राजान॰सवितारमेतं ॥ वायोरात्मानंकवयोनिचिक्युः ॥
रश्मि॰रश्मीनांमध्येतपंतं ॥ ऋतस्यपदेकवयोनिपांति ॥ यओंडकोशे
भुवनंबिभर्ति ॥ अनिर्भिण्णःसन्नथलोकान्विचष्टे ॥ यस्योंडकोश॰शु
ष्ममाहुःप्राणमुल्बं ॥ तेनकृप्तोमृतेनाहमस्मि ॥ सुवर्णकोश॰रजसाप
रीवृतं ॥ देवानांवसुधानींविराजं ॥ १९ ॥ अमृतस्यपूर्णांतासुकलांविच

क्षते ॥ पादꣳपद्भ्यौतुर्नकिलाविवित्से ॥ येनर्तवःपंचधोतकॢप्ताः ॥ उत
वाषट्धामनसोतकॢप्ताः ॥ तꣳपद्भ्यौतारमृतुभिःकल्पमानं ॥ ऋतस्यपदे
कवयोनिपाँति ॥ अंतःप्रविष्टंकर्तारमेतं ॥ अंतश्चंद्रमसिमनसाचरंतं ॥
सहैवसंतंनविजानंतिदेवाः ॥ इंद्रस्यात्मानꣳशतधाचरंतं ॥ इंद्रोराजा
जगतोयईशे ॥ सप्तहोतासप्तधाविकॢप्तः ॥ परेणतंतुंपरिपिच्यमानं ॥
अंतरादित्येमनसाचरंतं ॥ देवानाꣳहृदयंब्रह्मान्वविंदत् ॥ ब्रह्मैतत्ब्रह्म
णउज्जभार ॥ अर्कꣳश्चोतंतꣳसरिरस्यमध्ये ॥ आयस्मिन्त्सप्तपेरवः ॥
मेहंतिवहुलाꣳश्रियं ॥ वक्वश्चामिंद्रगोमतीं ॥ अच्युतांवहुलाꣳश्रियं ॥
सहरिर्वसुवित्तमः ॥ पेरुरिंद्रायपिन्वते ॥ वक्वश्चामिंद्रगोमतीं ॥ अच्युतां
तांवहुलाꣳश्रियं ॥ मह्यमिंद्रोनियच्छतु ॥ शतꣳशताअस्ययुक्ताहरीणां ॥
अर्वाङायातुवसुभीरश्मिरिंद्रः ॥ प्रमꣳहमाणोवहुलाꣳश्रियं ॥ रश्मिरिंद्रः

सवि॒तामे॒नियं॑च्छतु ॥ घृ॒तंते॒जोम॑धु॒मदिं॑द्रि॒यं ॥ मय्य॒यम॒ग्निर्द॑धातु ॥ हरिः
प॒तं॒गः प॑ट॒रीसु॑प॒र्णः ॥ द्वि॒वि॒क्षयो॒नभ॑सा॒यएति॑ ॥ स॒न॒इंद्रः॑कामव॒रंद॑दातु ॥
पंचा॑रं॒चक्रंपरि॑वर्ततेपृथु ॥ हिर॑ण्यज्योतिःसरि॒रस्य॒मध्ये॑ ॥ अज॑स्र॒ंज्योति
र्नभ॑सा॒सर्पदे॑ति ॥ स॒न॒इंद्रः॑कामव॒रंद॑दातु ॥ स॒प्तयुं॑जंति॒रथ॒मेक॑चक्रं
॥ २० ॥ एको॑अश्वो॑वहतिसप्तना॒मा ॥ त्रि॒नाभि॑च॒क्रम॒ज॒रम॑नर्व ॥ येने॒मा
विश्वा॒भुव॑नानितस्थुः ॥ भ॒द्रंप॑श्यं॒त॒उप॑सेदुरग्रे ॥ तपो॑दी॒क्षामृष॑यः॒सुव॒र्वि
दः ॥ ततः॑क्ष॒त्रंब॑ल॒मोज॑श्चज॒ातं ॥ तद॒स्मैदे॒वाअ॒भिसं॑नमंतु ॥ श्वेत॑ꣳरश्मिं
बो॑भुज्यमा॑नं ॥ अ॒पां॒ने॒तार॑ंभुव॑नस्यगो॒पां ॥ इंद्रं॑नि॒चि॑क्युःपर॒मेव्यो॑मन् ॥
रोहि॑णीःपिं॒ग॒लाए॑क॒रूपाः ॥ क्षर॑तीःपिंग॒लाए॑क॒रूपाः ॥ श॒त॑ꣳस॒हस्रा
णि॒प्र॒युता॑नि॒नाव्या॑नां ॥ अ॒यंयः॑श्वे॒तो॒र॒श्मिः ॥ परि॒सर्वं॑मि॒दंजग॑त् ॥
प्र॒जांप॒शून्धना॑नि ॥ अ॒स्माकं॑ददातु ॥ श्वे॒तो॒र॒श्मिःपरि॒सर्वं॑बभूव ॥ सुव

वोविश्वरूपाः ॥ विरूपाःसंतोबहुधैकरूपाः ॥ तेषाꣳसप्तानामिहरंतिरस्तु ॥ रायस्पोषायसुप्रजास्त्वायसुवीर्यायं ॥ २१ ॥ अद्भ्यःसंभूतः पृथिव्यैरसाच्च ॥ विश्वकर्मणःसमवर्ततार्धि ॥ तस्यत्वष्टाविदधद्रूपमेति ॥ तत्पुरुषस्यविश्वमाजानमग्रे ॥ वेदाहमेतंपुरुषंमहांतं ॥ आदित्यवर्णतमसःपरस्तात् ॥ तमेवंविद्वानमृतइहभवति ॥ नान्यःपंथाविद्यतेयनाय ॥ प्रजापतिश्चरतिगर्भेअंतः ॥ अजायमानोबहुधाविजायते ॥ तस्यधीराःपरिजानंतियोनिं ॥ मरीचीनांपदमिच्छंतिवेधसः ॥ योदेवेभ्यआतपति ॥ योदेवानांपुरोहितः ॥ पूर्वोयोदेवेभ्योजातः ॥ नमोरुचायब्राह्मये ॥ रुचंब्राह्मंजनयंतः ॥ देवाअग्रेतदब्रुवन् ॥ यस्त्वैवंब्राह्मणोविद्यात् ॥ तस्यदेवाअसन्वशे ॥ ह्रीश्चतेलक्ष्मीश्चपत्न्यौ ॥ अहोरात्रेपार्श्वे ॥ नक्षत्राणिरूपं ॥ अश्विनौव्यात्तं ॥ इष्टंमनिषाण ॥ अमुंमनि

षाण ॥ सर्वमनिषाण ॥ २२ ॥ अर्हन्बिभर्षिसायकानिधन्वार्हन्निष्कंयजतंविश्वरूपं ॥ अर्हन्निदंदयसेविश्वमभ्वंनवाओजीयोरुद्रत्वदस्ति ॥ यस्तेस्तनःशशयोयोमयोभूर्येनविश्वापुष्यसिवार्याणि ॥ योरत्नधावसुविद्यःसुदत्रःसरस्वतितमिहधातवेकः ॥ पृथिवीसमित् ॥ तामग्निःसमिंधे ॥ साग्निꣳसमिंधे ॥ तामहꣳसमिंधे ॥ सामासमिद्धा ॥ आयुषातेजसा ॥ वर्चसाश्रिया ॥ यशसाब्रह्मवर्चसेन ॥ अन्नाद्येनसमिंताꣳस्वाहा ॥ अंतरिक्षꣳसमित् ॥ तांवायुःसमिंधे ॥ सावायुꣳसमिंधे ॥ तामहꣳ समिंधे ॥ सामासमिद्धा ॥ आयुषातेजसा ॥ वर्चसाश्रिया ॥ यशसा ब्रह्मवर्चसेन ॥ अन्नाद्येनसमिंताꣳस्वाहा ॥ द्यौःसमित् ॥ तामादि त्यःसमिंधे ॥ सादित्यꣳसमिंधे ॥ तामहꣳसमिंधे ॥ सामासमिद्धा ॥ आयुषातेजसा ॥ वर्चसाश्रिया ॥ यशसाब्रह्मवर्चसेन ॥ अन्नाद्येनस

मित्ताय स्वाहा ॥ प्राजापत्यामे समिदसि सपत्नक्षयणी ॥ भ्रातृव्यहामे
सि स्वाहा ॥ २३ ॥ इदं त एकं पर ऊत एकं तृतीयेन ज्योतिषा संविशस्व ॥
संवेशनस्तनुवै चारुरेधि प्रियो देवानां परमे सधस्थे ॥ धाता पुनातु सवि
ता पुनातु ॥ अग्नेस्तेजसा सूर्यस्य वर्चसा ॥ यं ते अग्निममंथाम वृषभाये
वपक्तवे ॥ इमं त शमया मसि क्षीरेण चोदकेन च ॥ यं त्वमग्ने समदह
स्त्वमु निर्वापया पुनः ॥ क्यांबूरत्र जायतां पाकदूर्वा व्यल्कशा ॥ शीति
के शीतिकावति ह्लादुके ह्लादुकावति ॥ मंडूक्या सुसंगमये म स्वाग्नि श
मय ॥ शं ते धन्वन्या आपः शमु ते सन्त्वनूक्याः ॥ शं ते समुद्रिया आपः श
मु ते सन्तु वर्ष्याः ॥ शं ते स्रवंतीस्तनुवे शमु ते सन्तु कूप्याः ॥ शं ते नीहारो ॥ ५७ ॥
वर्षतु शमु पृष्वावशीयतां ॥ अवसृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति
स्वधाभिः ॥ आयुर्वसान उपयातु शेष स संगच्छतां तनुवा जातवेदः ॥

सुफलासंसि ॥ इमंजीवेभ्यःपरिधिंदधामिमानोनुगादपरोअर्धमेतं ॥ शतंजीवंतुशरदःपुरूचीस्तिरोमृत्युंदधहेपर्वतेन ॥ इमानारीरविधवाःसुपत्नीरांजनेनसर्पिषासंसृशंतां ॥ अनश्रवोअनमीवाःसुशेवाआरोहंतुजनयोयोनिमग्ने ॥ २५ ॥ अपनःशोशुचदघमग्नेशुशुध्यारयिं ॥ अपनःशोशुचदघं ॥ सुक्षेत्रियासुगातुयावसूयाचयजामहे ॥ अपनःशोशुचदघं ॥ प्रयद्वंदिष्ठएषांप्रास्माकासश्चसूरयः ॥ अपनःशोशुचदघं ॥ प्रयदग्नेःसहस्वतोविश्वतोयंतिसूरयः ॥ अपनःशोशुचदघं ॥ त्वंहिविश्वतोमुखविश्वतःपरिभूरसि ॥ अपनःशोशुचदघं ॥ द्विषोनोविश्वतोमुखातिनावेवपारय ॥ अपनःशोशुचदघं ॥ सनःसिंधुमिवनावयातिपर्षास्वस्तये ॥ अपनःशोशुचदघं ॥ आपःप्रवणादिवयतीरपासत्स्यंदतामघं ॥ अप

नः शोशुचदघं ॥ उद्वनाद्दुदकानीवापास्मत्स्यैदतामघं ॥ अपनः शोशुचदघं ॥ आनंदायप्रमोदायपुनरागाꣳस्वान्गृहान् ॥ अपनः शोशुचदघं ॥ नवैतत्रप्रमीयतेगौरश्वः पुरुषः पशुः ॥ यत्रेदंब्रह्मक्रियतेपरिधिर्जीवनाय कमपनः शोशुचदघं ॥ गौर्धेनुर्भव्या ॥ मातारुद्राणांदुहितावसूनाꣳस्वसादित्यानाममृतस्यनाभिः ॥ प्रणुवोचंचिकितुषेजनायमागामनागामदितिंवधिष्ट ॥ पिबतूदकंतृणान्यत्तु ॥ ओमुत्सृजत ॥ कुर्वाणाचीरमात्मनः ॥ वासाꣳसिममगावश्च ॥ अन्नपानेचसर्वदा ॥ ततोमेश्रियमावह ॥ मातृदेवोभव ॥ पितृदेवोभव ॥ आचार्यदेवोभव ॥ अतिथिदेवोभव ॥ २६ ॥ भीषास्माद्वातःपवते ॥ भीषोदेतिसूर्यः ॥ भीषास्मादग्निश्चेंद्रश्च ॥ मृत्युर्धावतिपंचमइति ॥ सैषानंदस्यमीमाꣳसाभवति ॥ युवास्यात्साधुयुवाध्यायकः ॥ आशिष्ठोदृढिष्ठोबलिष्ठः ॥ तस्येयंपृथिवी

सर्वावित्तस्यंपूर्णास्यात् ॥ सएकोमानुषआनंदः ॥ तेयेशतंमानुषाआ
नंदाः ॥ सएकोमनुष्यगंधर्वाणांमानंदः ॥ श्रोत्रियस्यचाकामहतस्य ॥
तेयेशतंमनुष्यगंधर्वाणांमानंदाः ॥ सएकोदेवगंधर्वाणांमानंदः ॥ श्रोत्रि
यस्यचाकामहतस्य ॥ तेयेशतंदेवगंधर्वाणांमानंदाः ॥ सएकःपितृणां
चिरलोकलोकानांमानंदः ॥ श्रोत्रियस्यचाकामहतस्य ॥ तेयेशतंपितृ
णांचिरलोकलोकानांमानंदाः ॥ सएकआजानजानांदेवानांमानंदः ॥
श्रोत्रियस्यचाकामहतस्य ॥ तेयेशतमाजानजानांदेवानांमानंदाः ॥ स
एकःकर्मदेवानांदेवानांमानंदः ॥ येकर्मणादेवानपियंति ॥ श्रोत्रिय
स्यचाकामहतस्य ॥ तेयेशतंकर्मदेवानांदेवानांमानंदाः ॥ सएकोदेवा
नांमानंदः ॥ श्रोत्रियस्यचाकामहतस्य ॥ तेयेशतंदेवानांमानंदाः ॥
सएकइंद्रस्यानंदः ॥ श्रोत्रियस्यचाकामहतस्य ॥ तेयेशतमिंद्रस्यानंदाः ॥

सएकोबृहस्पतेरानंदः ॥ श्रोत्रियस्यचाकामहतस्य ॥ तेयेशतंबृहस्पते
रानंदाः ॥ सएकःप्रजापतेरानंदः ॥ श्रोत्रियस्यचाकामहतस्य ॥ तेये
शतंप्रजापतेरानंदाः ॥ सएकोब्रह्मणआनंदः ॥ श्रोत्रियस्यचाकामहह
तस्य ॥ सयश्चायंपुरुषे ॥ यश्चासावादित्ये ॥ सएकः ॥ सयंएवंवित् ॥
अस्माल्लोकात्प्रेत्य ॥ एतमन्नमयमात्मानमुपसंक्रामति ॥ एतंप्राणमय
मात्मानमुपसंक्रामति ॥ एतंमनोमयमात्मानमुपसंक्रामति ॥ एतंवि
ज्ञानमयमात्मानमुपसंक्रामति ॥ एतमानंदमयमात्मानमुपसंक्रामति ॥ एतं
तदप्येषश्लोकोभवति ॥ यतोवाचोनिवर्तंते ॥ अप्राप्यमनसासह ॥
आनंदंब्रह्मणोविद्वान् ॥ नबिभेतिकुतश्चनेति ॥ एतꣳहवावनतपति ॥
किमहꣳसाधुनाकरवं ॥ किमहंपापमकरवमिति ॥ सयएवंविद्वानेते
आत्मानꣳस्पृणुते ॥ उभेह्येवैषएतेआत्मानꣳस्पृणुते ॥ यएवंवेद ॥

इत्युपनिषत् ॥ २७ ॥ एषहिदेवःप्रदिशोनुसर्वाःपूर्वोहिजातःसउगर्भे
अंतः॥ सविजायमानःसजनिष्यमाणःप्रत्यङ्जनास्तिष्ठतिविश्वतोमुखः॥
विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोहस्तउतविश्वतस्पात् ॥ संबाहुभ्यां
नमतिसंपतत्रैर्द्यावापृथिवीजनयन्देवएकः ॥ सदसस्पतिमद्भुतंप्रियमिंद्र
स्यकाम्यं ॥ सनिंमेधामयासिषं ॥ उद्दीप्यस्वजातवेदोपद्मंनिर्ऋतिंमम ॥
पशूꣳश्चमह्यमावहजीवनंचदिशोदिश ॥ पुरुषस्यविद्मसहस्राक्षस्यमा
हादेवस्यधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ तत्पुरुषायविद्महेमहादेवाय
धीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ तत्पुरुषायविद्महेवक्रतुंडायधीमहि ॥
तन्नोदंतिःप्रचोदयात् ॥ तत्पुरुषायविद्महेचक्रतुंडायधीमहि ॥ तन्नो
नंदिःप्रचोदयात् ॥ तत्पुरुषायविद्महेमहासेनायधीमहि ॥ तन्नःष
ण्मुखःप्रचोदयात् ॥ तत्पुरुषायविद्महेसुवर्णपक्षायधीमहि ॥ तन्नोग

रुद्रः प्रचोदयात् ॥ वेदात्मनायविद्महेहिरण्यगर्भायधीमहि ॥ तन्नोब्रह्म
प्रचोदयात् ॥ नारायणायविद्महेवासुदेवायधीमहि ॥ तन्नोविष्णुः प्रचो
दयात् ॥ वज्रनखायविद्महेतीक्ष्णदꣳष्ट्रायधीमहि ॥ तन्नोनारसिꣳहः
प्रचोदयात् ॥ भास्करायविद्महेमहद्द्युतिकरायधीमहि ॥ तन्नोआदित्यः
प्रचोदयात् ॥ वैश्वानरायविद्महेलालीलायधीमहि ॥ तन्नोअग्निः प्रचो
दयात् ॥ कात्यायनायविद्महेकन्यकुमारिधीमहि ॥ तन्नोदुर्गिः प्रचोदयात्
॥ २८ ॥ सहस्रपरमादेवीशतमूलाशतांकुरा ॥ सर्वꣳहरतुमेपापंदूर्वादुः
स्वप्ननाशिनी ॥ कांडात्कांडात्प्ररोहंतीपरुषःपरुषःपरि ॥ एवानोदूर्वेप्र
तनुसहस्रेणशतेनच ॥ याशतेनप्रतनोषिसहस्रेणविरोहसि ॥ तस्यास्ते
देवीष्टकेविधेमहविषावयं ॥ अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरा ॥
शिरसाधारयिष्यामिरक्षस्वमांपदेपदे ॥ भूमिर्धेनुर्धरणीलोकधारिणी ॥

उद्धृतासिवराहेणकृष्णेनशतबाहुना ॥ मृत्तिकेहनमेपापंयन्मयादुष्कृतं
कृतं ॥ मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता ॥ मृत्तिकेदेहिमेपुष्टिंत्व
यिसर्वप्रतिष्ठितं ॥ मृत्तिकेप्रतिष्ठितेसर्वतन्मेनिर्णुदमृत्तिके ॥ तयाहते
नपापेनगच्छामिपरमांगतिं ॥ यतइंद्रभयामहेततोनोअभयंकृधि ॥ मघ
वन्छग्धितवतन्नऊतयेविद्विषोविमृधोजहि ॥ स्वस्तिदाविशस्पतिर्वृत्रहा
विमृधोवशी ॥ वृषेंद्रःपुरएतुनःस्वस्तिदाअभयंकरः ॥ स्वस्तिनइंद्रोवृद्ध
श्रवाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनो
बृहस्पतिर्दधातु ॥ आपांतमन्युस्तृपलप्रभर्माधुनिःशिमीवांछरुमाँऋ
जीषी ॥ सोमोविश्वान्यत्सावनानिनार्वागिंद्रंप्रतिमानानिदेभुः ॥ ब्रह्म
जज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्नियाउपमाअ
स्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ स्योनापृथिविभवानृक्षरानिवेश

यदशांतंतदपगच्छतात् ॥ अत्याशनादतीपानाद्यच्चउग्रात्प्रतिग्रहात् ॥ तन्नोवरुणोराजापाणिनाह्यवमर्शतु ॥ सोहमपापोविरजोनिर्मुक्तोमुक्तकिल्बिषः ॥ नाकस्यपृष्ठमारुह्यगच्छेद्ब्रह्मसलोकतां ॥ यश्चाप्सुवरुणःसपुनात्वघमर्षणः ॥ इममेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमꣳसचतापरुष्णिया ॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥ ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत ॥ ततोरात्रिरजायततःसमुद्रोअर्णवः ॥ समुद्रादर्णवादधिसंवत्सरोअजायत ॥ अहोरात्राणिविदधद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षमथोसुवः॥३०॥यत्पृथिव्याꣳरजस्वमांतरिक्षेविरोदसी ॥ इमाꣳस्तद्वापोवरुणःपुनात्वघमर्षणः ॥ पुनंतुवसवःपुनातुवरुणःपुनात्वघमर्षणः ॥ एषभूतस्यमध्येभुवनस्यगोप्ता ॥ एषपुण्यकृतांलोकानेषमृत्योर्हिरण्मयं ॥

द्यावापृथिव्योर्हिरण्मय꣡ꣳस꣡ꣳश्रित꣡ꣳसुव꣡रः॥सन꣡ःसुव꣡रꣳस꣡ꣳशिशाधि॥आ
द्र꣡ज्वलति꣡ज्योति꣡रहमस्मि॥ज्योति꣡र्ज्वल꣡ति꣡ब्रह्माहमस्मि॥योहमस्मि꣡ब्रह्मा
हमस्मि॥अ꣡हमस्मि꣡ब्रह्माहमस्मि॥अ꣡हमे꣡वाहंमांजु꣡होमि꣡स्वाहा॥अ꣡का
र्यकार्यैवकी꣡र्णास्ते꣡नोभ्रू꣡णहागु꣡रुत꣡ल्पगः॥व꣡रु꣡णोपाम꣡घमर्ष꣡णस्तस्मा꣡त्पापा
त्प्रमु꣡च्यते॥र꣡जोभूमि꣡स्त्व꣡मा꣡रोद꣡यस्व꣡प्रव꣡दं꣡ति꣡धीराः॥आक्रा꣡न्त्समुद्रः
प्र꣡थ꣡मेविध꣡र्मज꣡नयन्प्र꣡जाभुव꣡नस्य꣡राजा॥वृ꣡षा꣡प꣡वित्रे꣡अधि꣡सानो꣡अव्ये꣡वृह
त्सोमो꣡वावृधे꣡सुवा꣡नइंदुः॥३१॥ज꣡ातवेदसेसुनवाम꣡सोम꣡मरातीय꣡तोनिद꣡
हाति꣡वेदः॥सन꣡ःपर्ष꣡दतिदु꣡र्गा꣡णि꣡विश्वा꣡ना꣡वे꣡वसिंधुं꣡दु꣡रि꣡तात्य꣡ग्निः॥ताम्
ग्निवर्णा꣡तपसाज्वल꣡ंतींवै꣡रोच꣡नींकर्मफ꣡लेषु꣡जुष्टा꣡म्॥दु꣡र्गा꣡दे꣡वी꣡ꣳशर꣡णमहंप्र
प꣡द्येसुत꣡रसितरसे꣡नमः॥अग्ने꣡त्वंपा꣡रय꣡यानव्यो꣡अस्मान्त्स्व꣡स्ति꣡भि꣡रतिदु꣡र्गा
णि꣡विश्वा꣡॥पू꣡श्चपृथ्वीबहु꣡लान꣡उ꣡र्वीभवा꣡तो꣡कायत꣡नायश꣡योः॥विश्वा

निनोदुर्गहाजातवेदःसिंधुंननावादुरितातिपर्षि ॥ अग्नेअत्रिवन्मनसागृ
णानोस्माकंबोध्यवितातनूनां ॥ पूतनाजित ँसहमानमुग्रमग्नि ँहुवेमप
रमात्सधस्थात् ॥ सनःपर्षदतिदुर्गाणिविश्वाक्षामद्देवोअतिदुरितात्यग्निः॥
प्रत्नोषिकमीड्योअध्वरेषुसनाच्चहोतानव्यश्चसत्सि ॥ स्वांचाग्नेतनुवंपि
प्रयस्वास्मभ्यंचसौभगमायजस्व ॥ गोभिर्जुष्टमयुजोनिषिक्तंतवेद्रवि
ष्णोरनुसंचरेम ॥ नाकस्यपृष्ठमभिसंवसानोवैष्णवींलोकइहमादयंतां
॥ ३२ ॥ भूम्यैचपृथिव्यैचमहतेचस्वाहाभुवोवायवेचांतरिक्षायचमह
तेचस्वाहासुवरादित्यायचदिवेचमहतेचस्वाहाभूर्भुवःसुवश्चंद्रमसेचनक्ष
त्रेभ्यश्चदिग्भ्यश्चमहतेचस्वाहानमोदेवेभ्यःस्वधापितृभ्योभूर्भुवःसुवर्मह
रोम् ॥ पाहिनोअग्नएनसेस्वाहा ॥ पाहिनोविश्ववेदसेस्वाहा ॥ यज्ञं
पाहिविभावसोस्वाहा ॥ सर्वपाहिशतक्रतोस्वाहा ॥ पाहिनोअग्नए

कया ॥ पाह्युतद्वितीयया ॥ पाहाजूंतृतीयया ॥ पाहिगीर्भिश्चतसृ
भिर्वसोस्वाहा ॥ घृतंमिमिक्षिरेघृतमस्ययोनिर्घृतेश्रितोघृतमुवस्यधा
मं ॥ अनुष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिहव्यं ॥ समुद्रादूर्मि
र्मधुमाँउदारदुपाँशुनासमंसृतत्वमानट् ॥ घृतस्यनामगुह्यंयदस्ति
जिह्वादेवानाममृतस्यनाभिः ॥ वयंनामप्रब्रवामाघृतेनास्मिन्यज्ञेधार
यामानमोभिः ॥ उपब्रह्माशृणवच्छस्यमानंचतुःशृंगोवमीद्गौरएतत्
॥ ३३ ॥ सहस्रशीर्षदेवंविश्वाक्षैविश्वशंभुवं ॥ विश्वंनारायणंदेवमक्षरं
परमंपदं ॥ विश्वतःपरमांनित्यंविश्वंनारायणँहरिं ॥ विश्वमेवेदंपुरु
षस्तद्विश्वमुपजीवति ॥ पतिंविश्वस्यात्मेश्वरँशाश्वतँशिवमच्युतं ॥
नारायणंमहाज्ञेयंविश्वात्मानंपरायणं ॥ नारायणपरोज्योतिरात्मानारा
यणःपरः ॥ नारायणपरंब्रह्मतत्त्वंनारायणःपरः ॥ नारायणपरोध्या

ताध्यानंनारायणःपरः ॥ यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेपिवा ॥ अंत
र्बहिश्चतत्सर्वंव्याप्यनारायणःस्थितः ॥ अनंतमव्ययंकविꣳसमुद्रेतंवि
श्वशंभुवं ॥ पद्मकोशप्रतीकाशꣳहृदयंचाप्यधोमुखं ॥ अधोनिष्ट्यावि
तस्यांतेनाभ्यामुपरितिष्ठति ॥ ज्वालमालाकुलंभातीविश्वस्यायतनंम
हत् ॥ संततꣳशिलाभिस्तुलंबत्याकोशसंनिभं ॥ तस्यांतेसुषिरꣳसूक्ष्मं
तस्मिन्त्सर्वप्रतिष्ठितं ॥ तस्यमध्येमहानग्निर्विश्वार्चिर्विश्वतोमुखः ॥ सो
ग्रभुग्विभजन्तिष्ठन्नाहारमजरःकविः ॥ तिर्यगूर्ध्वमधःशायीरश्मयःस्तस्य
संतता ॥ संतापयतिस्वंदेहमापादतलमस्तकः ॥ तस्यमध्येवह्निशिखा
अणीयोर्ध्वाव्यवस्थितः ॥ नीलतोयदमध्यस्थाद्विद्युल्लेखेवभास्वरा ॥
नीवारशूकवत्तन्वीपीताभास्वत्यणूपमा ॥ तस्याःशिखायामध्येपरमात्मा
व्यवस्थितः ॥ सब्रह्मसशिवःसहरिःसेंद्रःसोक्षरःपरमःस्वराट् ॥ ३४ ॥

विश्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत् ॥ सर्वोह्येषरुद्रस्तस्मैरुद्रा
यनमोअस्तु ॥ कद्रुद्रायप्रचेतसेमीढुष्टमायतव्यसे ॥ वोचेमशंतमꣳ
हृदे ॥ सर्वोह्येषरुद्रस्तस्मैरुद्रायनमोअस्तु ॥ आपःपुनंतुपृथिवींपृथि
वीपूतापुनातुमां ॥ पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमां ॥ यदुच्छिष्टमभो
ज्यꣳयद्वादुश्चरितंममं ॥ सर्वंपुनंतुमामापोसतांचप्रतिग्रहꣳस्वाहा ॥ मेधांमे
इंद्रोददातुमेधांदेवीसरस्वती ॥ मेधांमेअश्विनावुभावाधत्तांपुष्करस्रजा ॥
अप्सरासुचयामेधागंधर्वेषुचयन्मनः ॥ दैवींमेधासरस्वतीसामांमेधासु
रभिर्जुषताꣳस्वाहा ॥ आमांमेधासुरभिर्विश्वरूपाहिरण्यवर्णाजगतीज
गम्या ॥ ऊर्जस्वतीपयसापिन्वमानासामांमेधासुप्रतीकाजुषंतां ॥ ३५ ॥
अपैतुमृत्युरमृतंनआगन्वैवस्वतोनोअभयंकृणोतु ॥ पूर्णवनस्पतेरिवा
भिनःशीयताꣳरयिःसचतांनःशचीपतिः ॥ परंमृत्योअनुपरेहिपंथांयस्ते

स्वङ्कृतंरोदेवयानात् ॥ चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजा ँरीरिषोमो
तवीरान् ॥ वातंप्राणंमनसान्वारभामहेप्रजापतिंयोभुवनस्यगोपाः ॥
सनोमृत्योस्त्रायतांपात्व ँहसोज्योग्जीवाजरामशीमहि ॥ अमुत्रभूयादध
यद्यमस्यबृहस्पतेअभिशस्तेरमुंचः ॥ प्रत्यौहतामश्विनामृत्यमस्माद्देवानां
मग्नेभिषजाशचीभिः ॥ हरि ँहरंतमनुयंतिदेवाविश्वस्येशानंवृषभंमती
नां ॥ ब्रह्मसरूपमनुमेदमागादयंनंमाविवधीर्विक्रमस्व ॥ शल्कैरग्निमिं
धानउभौलोकौसनेमहं ॥ उभयोर्लोकयोर्ऋध्वातिमृत्युंतराम्यहं ॥ माछि
दोमृत्योमावधीर्मामेवलंविवृहोमाप्रमोषीः ॥ प्रजांमामेरीरिषआयुरुग्रनृ
चक्षसंत्वाहविषाविधेम ॥ मानोमहांत० रीरिषः ॥ मानस्तोके०विधेम
ते ॥ प्रजापतेनत्व० रयीणां ॥ स्वस्तिदाविश० अभयंकरः ॥ त्र्यंबकं
यजामहे०मामृतात् ॥ येतेसहस्रमयुतंपाशामृत्योमर्त्यायहंतवे ॥ तान्य

ऋग्विधानायुस्वाहा ॥ कृषोत्कायुस्वाहा ॥ क्षुत्पिपासामलांज्येष्ठामलक्ष्मी
र्नाशयाम्यहं ॥ अभूतिमसमृद्धिंचसर्वान्निर्णुदमेपाप्मानꣳस्वाहा ॥ अ
न्नमयप्राणमयमनोमयविज्ञानमयमानंदमयमात्मामेशुध्यतांज्योतिरहं
विरजाविपाप्माभूयासꣳस्वाहा ॥ ३७ ॥ श्रद्धायांप्राणेनिविष्टोमृतंजुहो
मि ॥ श्रद्धायांमपानेनिविष्टोमृतंजुहोमि ॥ श्रद्धायांव्यानेनिविष्टोमृतं
जुहोमि ॥ श्रद्धायांसमुदानेनिविष्टोमृतंजुहोमि ॥ श्रद्धायाꣳसमानेनिविष्टो
मृतंजुहोमि ॥ ब्रह्मणिमआत्मामृतत्वाय ॥ अमृतोपस्तरणमसि ॥ श्रद्धा
यांप्राणेनिविष्टोमृतंजुहोमि ॥ शिवोमाविशाप्रदाहाय ॥ प्राणायुस्वाहा ॥
श्रद्धायांमपानेनिविष्टोमृतंजुहोमि ॥ शिवोमाविशाप्रदाहाय ॥ अपाना
युस्वाहा ॥ श्रद्धायांव्यानेनिविष्टोमृतंजुहोमि ॥ शिवोमाविशाप्रदाहा
य ॥ व्यानायुस्वाहा ॥ श्रद्धायांसमुदानेनिविष्टोमृतंजुहोमि ॥ शिवो

मांविशाप्रदाहाय ॥ उदानायस्वाहा ॥ श्रद्धायाꣳसमानेनिविष्टोमृतंजु
होमि ॥ शिवोमांविशाप्रदाहाय ॥ समानायस्वाहा ॥ ब्रह्मणिमआत्मामृ
तत्वाय ॥ औंतद्ब्रह्म ॥ औंतद्वायुः ॥ औंतदात्मा ॥ औंतत्सत्यं ॥ औंतत्स
वं ॥ औंतत्पुरोर्नमः ॥ अंतश्चरतिभूतेषुगुहायांविश्वमूर्तिषु ॥ त्वंयज्ञस्त्वं
वषट्कारस्त्वमिंद्रस्त्वꣳरुद्रस्त्वंविष्णुस्त्वंब्रह्मत्वंप्रजापतिः ॥ त्वंतदाप
आपोज्योतीरसोमृतंब्रह्मभूर्भुवःसुवरोम् ॥ अमृतापिधानमसि ॥ श्रद्धायाँ
प्राणेनिविश्यामृतꣳहुतं ॥ प्राणमन्नेनाप्यायस्व ॥ श्रद्धायांमपानेनि
विश्यामृतꣳहुतं ॥ अपानमन्नेनाप्यायस्व ॥ श्रद्धायाँव्यानेनिविश्यामृ
तꣳहुतं ॥ व्यानमन्नेनाप्यायस्व ॥ श्रद्धायांमुदानेनिविश्यामृतꣳहुतं ॥
उदानमन्नेनाप्यायस्व ॥ श्रद्धायाꣳसमानेनिविश्यामृतꣳहुतं ॥ समान
मन्नेनाप्यायस्व ॥ अंगुष्ठमात्रःपुरुषोंगुष्ठंचसमाश्रितः ॥ ईशःसर्वस्य

जगतःप्रभुप्रीणातिविश्वभुक् ॥ वाङ्मआसन् ॥ नसोःप्राणः ॥ अक्ष्यो श्चक्षुः ॥ कर्णयोःश्रोत्रं ॥ बाहुवोर्बलं ॥ ऊरुवोरोजः ॥ अरिष्टाविश्वा न्यंगानितनूः ॥ तनुवांमेसहनमस्तेअस्तुमामाहि ँसीः ॥ ३८ ॥ इति अरणउपनिषत्समाप्ता ॥

अथदशशांतिप्रारंभः ॥ ॐभद्रंकर्णेभिःशृणुयामदेवाः ॥ भद्रंप श्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवा ँसस्तनूभिः ॥ व्यशेमदेवहितं यदायुः ॥ स्वस्तिनइंद्रोवृद्धश्रवाः ॥ स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्ति नस्तार्क्ष्योअरिष्टनेमिः ॥ स्वस्तिनोबृहस्पतिर्दधातु ॥ ॐशांतिःशांतिः शांतिः ॥ ॐनमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवेबृहतेकरोमि ॥ ॐशांतिःशांतिः शांतिः ॥ ॐतच्छंयोरावृणीमहे ॥ गातुंयज्ञाय ॥ गातुंयज्ञपतये ॥

दैवीस्वस्तिरस्तुनः ॥ स्वस्तिर्मानुषेभ्यः ॥ ऊर्ध्वंजिगातुभेषजं ॥ शंनो
अस्तुद्विपदे ॥ शंचतुष्पदे ॥ ॐशांतिःशांतिःशांतिः ॥ नमोवाचेया
चोदितायाचानुदितातस्यैवाचेनमोनमोवाचेनमोवाचस्पतयेनमऋषि
भ्योमंत्रकृद्भ्योमंत्रपतिभ्योमामामृषयोमंत्रकृतोमंत्रपतयःपरादुर्माहमृषी
न्मंत्रकृतोमंत्रपतीन्परादांवैश्वदेवींवाचंमुद्यास ॥ शिवामदंस्तांजुष्टांदेवे
भ्यःशर्ममेद्यौःशर्मपृथिवीशर्मविश्वमिदंजगत् ॥ शर्मचंद्रश्चसूर्यश्चशर्म
ब्रह्मप्रजापती ॥ भूतंवदिष्येभुवनंवदिष्येतेजोवदिष्येयशोवदिष्येतपो
वदिष्येब्रह्मवदिष्येसत्यंवदिष्येतस्माअहमिदमुपस्तरणमुपस्तृणउपस्त
रणंमेप्रजायैपशूनांभूयादुपस्तरणमहंप्रजायैपशूनांभूयासंप्राणापानौमू
त्योर्मापातंप्राणापानौमामाहासिष्टंमधुमनिष्येमधुजनिष्येमधुवक्ष्यामि
मधुवदिष्यामिमधुमतींदेवेभ्योवाचमुद्यास ॥ शुश्रूषेण्यांमनुष्येभ्यस्तंमा

देवाअवंतुशोभायैपितरोनुमदंतु ॥ ॐशांतिःशांतिःशांतिः ॥ ॐशंनो
वातःपवतांमातरिश्वाशंनस्तपतुसूर्यः ॥ अहानिशंभवंतुनःशꣳरात्रिः
प्रतिधीयतां ॥ शमुषानोव्युच्छतुशमादित्यउदेतुनः ॥ शिवानःशंतमा
भवसुमृडीकासरस्वति ॥ मातेव्योमसंदृशि ॥ इडायैवास्त्वसिवास्तुम
ह्यास्तुमंतौभूयास्तमावास्तौश्छित्सह्यवास्तुःसभूयाद्योसान्द्वेष्टियंचवयं
द्विष्मः ॥ प्रतिष्ठासिप्रतिष्ठावंतौभूयास्तमाप्रतिष्ठायाश्छित्सह्यप्रतिष्ठः
सभूयाद्योसान्द्वेष्टियंचवयंद्विष्मः ॥ आवातवाहिभेषजंविवातवाहियं
द्रपः ॥ त्वꣳहिविश्वभेषजोदेवानांदूतईयसे ॥ द्वाविमौवातौवातआसिं
धोरापरावतः ॥ दक्षंमेअन्यआवातुपरान्योवातुयद्रपः ॥ यदुदोवातते
गृहेसृतस्यनिधिर्हितः ॥ ततोनोदेहिजीवसेततोनोधेहिभेषजं ॥ ततो
नोमहआवहवातआवातुभेषजꣳशंभूर्मयोभूनोहृदे ॥ प्रणआयूꣳषिता

रिषत् ॥ इंद्रेस्यगृहोसितंत्वाप्रपद्येसगुःसाश्वः ॥ सहयन्मेअस्तितेन ॥
भूःप्रपद्येभुवःप्रपद्येसुवःप्रपद्येभूर्भुवःसुवःप्रपद्येवायुंप्रपद्येनातंदेवतांप्र
पद्येश्मानमाखणंप्रपद्येप्रजापतेर्व्रह्मकोशंव्रह्मप्रपद्यओंप्रपद्ये ॥ अंतरि
क्षमउर्वैतरंवृहदुग्रयःपर्वताश्चययावातस्वरत्यास्वस्तिमांतयास्वस्त्यास्व
स्तिमानसानि ॥ प्राणापानौमृत्योर्मापातंप्राणापानौमामाहासिष्टंमयि
मेधांमयिप्रजांमय्यग्निस्तेजोदधातुमयिमेधांमयिप्रजांमयींद्रइंद्रियंदधा
तुमयिमेधांमयिप्रजांमयिसूर्योभ्राजोदधातु ॥ द्युभिरक्तुभिःपरिपातम
स्मानरिष्टेभिरश्विनासौभगेभिः ॥ तन्नोमित्रोवरुणोमामहंतामदितिःसिं
धुःपृथिवीउतद्यौः ॥ कयानश्चित्रआभुवदूतीसदावृधःसखा ॥ कयाश
चिष्ठयावृता ॥ कस्त्वासत्योमदानांमꣳहिष्ठोमत्सदंधसः ॥ दृढाचिदारु
जेवसु ॥ अभीषुणःसखीनामविताजरितॄणां ॥ शतंभवास्यूतिभिः ॥

वयः॑सुप॒र्णाऽउप॑सेदु॒रिन्द्रं॑प्रि॒यमे॑धाऋष॒योनाध॑मानाः ॥ अप॑ध्वा॒न्तमू॒र्णु॑हि
पू॒र्धिच॑क्षु॒र्मुमु॑ग्ध्य॒स्मान्नि॒धये॑वबद्धान् ॥ शं॒नोदे॒वीर॒भिष्ट॑य॒आपो॑भवंतुपी
त॒ये ॥ शंयोर॒भिस्र॑वंतुनः ॥ ईशा॑नावार्याणांक्षयंतीश्चर्षणी॒नां ॥ अ॒पो
या॑चामि॒भेष॑जं ॥ सु॒मि॒त्रान॒आप॒ओष॑धयः॒संतु॒दुर्मि॒त्रास्तस्मै॑भूयासु॒र्योऽस्मा
न्द्वेष्टि॒यंचव॒यंद्वि॒ष्मः ॥ आपो॒हिष्ठा॑म॒योभु॒वस्तान॑ऊ॒र्जेद॑धातन ॥ म॒हेर
णा॑य॒चक्ष॑से ॥ यो॒वः॒शि॒वत॑मो॒रस॒स्तस्य॑भाजयते॒हनः॑ ॥ उ॒श॒तीरि॑वमा
तरः॑ ॥ तस्मा॑अरंगमामवो॒यस्य॒क्षया॑य॒जिन्व॑थ ॥ आपो॑ज॒नय॑थाचनः ॥
पृ॒थि॒वी॒शां॒तासा॒न्नि॒शां॒तासा॑मे॒शां॒ताशु॒च॑ः॒शमयतु ॥ अं॒तरि॑क्ष॑ः॒शां॒तं
तद्वा॒यु॒नाशां॒तंत॒न्मे॒शां॒त॑ः॒शु॒च॑ः॒शमयतु ॥ द्यौः॒शां॒तासादि॒त्येन॒शां॒तासा
मे॒शां॒ताशु॒च॑ः॒शमयतु ॥ पृ॒थि॒वीशां॑ति॒रं॒तरि॑क्ष॑ः॒शां॒ति॒र्द्यौः॒शां॒ति॒र्दि॒शः॒शां
ति॒रवां॒तर॑दि॒शाः॒शां॒ति॒र॒ग्निः॒शां॒ति॒र्वा॒युः॒शां॒ति॒रा॒दि॒त्यः॒शां॒ति॒श्च॒न्द्र॒मा॒ः॒शां॒ति

नातु ॥ ब्रह्मणश्चोतन्यसिब्रह्मणआणीस्थोब्रह्मणआवपनमसिधारितेयं
पृथिवीब्रह्मणामहीधारितमेनेनमहदुंतरिक्षंदिवंदाधारपृथिवी ९सदेवांय
दुहंवेदुतदुहंधारयाणिमामद्वेदोधिविस्रसत् ॥ मेधामनीषेमाविशता ९स
मीचींभूतस्यभव्यस्यावरुध्यैसर्वमायुरयाणिसर्वमायुरयाणि ॥ आभिर्गी
र्भिर्यदतौनऊनमाप्यायहरिवोवर्धमानः ॥ यदास्तोतृभ्योमहिगोत्रारुजा
सिभूयिष्ठभाजोअधतेस्याम ॥ ब्रह्मप्रावादिष्मतन्नोमाहासीत् ॥ ॐशांतिः
शांतिःशांतिः ॥ ॐसंत्वांसिंचामियजुषाप्रजामायुर्धनंच ॥ ॐशांतिः
शांतिःशांतिः ॥ ॐशंनोमित्रःशंवरुणः ॥ शंनोभवत्वर्यमा ॥ शंनइंद्रो
बृहस्पतिः ॥ शंनोविष्णुरुरुक्रमः ॥ नमोब्रह्मणे ॥ नमस्तेवायो ॥ त्वमे
वप्रत्यक्षंब्रह्मासि ॥ त्वमेवप्रत्यक्षंब्रह्मवदिष्यामि ॥ ऋतंवदिष्यामि ॥
सत्यंवदिष्यामि ॥ तन्मामवतु ॥ तद्वक्तारमवतु ॥ अवतुमां ॥ अवतु

वक्तारं ॥ ओंशांतिःशांतिःशांतिः ॥ सहनाववतु ॥ इतित्रिःॐशांतिः
शांतिःशांतिः ॥ इतिदशशांतयःसमाप्ताः ॥
अथहिरण्यकेशीसूत्रमंत्रप्रारंभः ॥ ॐ अयंतइध्मआत्माजातवेदस्ते
नेध्यस्ववर्धस्वचेंधिवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमे
धय ॥ युक्तोवहजातवेदःपुरस्तादग्नेविद्विकर्मक्रियमाणंयथेदं ॥ त्वंभि
षक्भेषजस्यासिकर्तात्वयागाश्वान्पुरुषान्सनेम ॥ यातिरश्चीनिपद्यसेहं
विधरणीइति ॥ तांत्वाघृतस्यधारयान्नौस९राधनींयजे ॥ यदस्यकर्मणो
त्यरीरिचंयद्वान्यूनमिहाकरं ॥ अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्व९स्विष्ट९सुहु
तंकरोतुमे ॥ अग्नयेस्विष्टकृतेसुहुतहुतेसर्वहुतआहुतीनांकामाना९समर्ध
यित्रेस्वाहा ॥ समुद्रंवःप्रहिणोम्यक्षितास्वांयोनिमपिगच्छत ॥ अच्छिद्रः
प्रजयाभूयासंमापरासेचिमत्पयः॥ येचेहपितरोयेचनेहया९श्चविद्मया९

उचनप्रविद्ध ॥ अग्नेतान्वेत्थयदितेजातवेदस्तयाप्रत्त॰स्वधयामदंतुस्व
धानमः ॥ अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमयाअसि ॥ अयसामन
साधृतोयसाहव्यमूहिषेयानोधेहिभेषज॰स्वाहा ॥ १ ॥ योब्रह्माब्रह्मणउ
ज्जभारप्राणेश्वरःकृत्तिवासाःपिनाकी ॥ ईशानोदेवःसनआयुर्दधातुतस्मै
जुहोमिहविषाघृतेनस्वाहा ॥ विभ्राजमानःसरिरस्यमध्याद्रोचमानाघर्म
रुचिर्यआगात् ॥ समृत्युपाशानपनुद्यघोरामिहायुषेनोघृतमत्तुदेवास्वा
हा ॥ ब्रह्मज्योतिर्ब्रह्मपत्नीषुगर्भंयमोदधात्पुरुरूपंजयंतं ॥ सुवर्णरंभंगृहस
र्कमर्चन्नमायुषेवर्धयामोघृतेनस्वाहा ॥ श्रियंलक्ष्मीमंबिकामोपलांगांषष्ठीं
चयामिंद्रसेनेत्युदाहुः ॥ तांविद्यांब्रह्मयोनि॰सरूपामिहायुषेतर्पयामोघृ
तेनस्वाहा ॥ दाक्षायण्यःसर्वयोन्यःसयोन्यःसहस्रशोविश्वरूपाविरूपाः ॥
ससूनवःसपतयःसयूथ्याआयुषेनोघृतमिदंजुषता॰स्वाहा ॥ दिव्याग

भर्तुसजायतांवीरतमःस्वानां ॥ आतेगर्भोयोनिमेतुपुमान्बाणइवेषुधिं ॥
आवीरोअत्रजायतांपुत्रस्तेदशमास्यः ॥ करोमितेप्राजापत्यमागर्भोयोनि
मेतुते ॥ अनूनःपूर्णोजायतामनंधोश्लोणोपिशाचधीरः ॥ यानिप्रभूणि
वीर्याण्यृषभाजनयंतुनः ॥ तैस्त्वंगर्भिणीभवसजायतांवीरतमःस्वानां ॥
योवशायांगर्भोयश्चवेहतींद्रस्तंनिदधेवनस्पतौ ॥ तेनत्वंगर्भिणीभवसा
प्रसूर्धेनुगाभव ॥ सन्नाम्नःस॰हृदयानिसन्नाभिःसंत्वचः ॥ संत्वाकामस्य
योक्रेणयुंजान्यविमोचनाय ॥ मामनुव्रताभवसहचर्यामयाभव ॥ यातेप
तिघ्नीतनूर्जारघ्नींत्वेतांकरोमिशिवात्वंमह्यमेधिक्षुरपविर्जारेभ्यः ॥ अथा
स्यैसुखेनमुखमीप्सतेमधुहेमध्विदंमधुजिह्वामेमधुवादिनी ॥ मुखेमेसार
घंमधुदत्सुसंवननंकृतं ॥ चक्रवाक॰संवननंयन्नदीभ्यउदाहृतं ॥ यद्युक्तो
देवगंधर्वस्तेनसंवनिनौस्वकः ॥ भूःप्रजापतिनात्यृषभेणस्कंदयामिवीरं

धस्व ॥ भुवःप्रजापतिनात्यूर्पभेणस्कंदयामिवीरंधस्व ॥ सुवःप्रजाप
तिनात्यूर्पभेणस्कंदयामिवीरंधस्व ॥ ३ ॥ विश्वाउतत्वयावयंधाराउद
न्याइव ॥ अतिगाहेमहिद्विपः ॥ अश्माभवपरशुर्भवहिरण्यमस्तृतंभ
व ॥ वेदोवैपुत्रनामासिसजीवशरदःशतं ॥ अंगादंगात्संभवसिहृदया
दधिजायसे ॥ आत्मावैपुत्रनामासिसजीवशरदःशतं ॥ शंडोमर्कउप
वीरःशांडिकेरउलूखलः ॥ च्यवनोनश्यतादितःस्वाहा ॥ आलिखन्वि
लिखन्ननिमिषन्किंवदंतउपश्रुतिःस्वाहा ॥ अर्यम्णःकुंभीशत्रुःपात्रपाणि
र्निपुणिःस्वाहा ॥ आंत्रीमुखःसर्पपारुणोनश्यतादितःस्वाहा ॥ केशिनी
श्वलोमिनीवजाबोजोपकाशिनी ॥ अपेतनश्यतादितःस्वाहा ॥ कौवेर
काविश्ववासोरक्षोराजेनप्रेषिताः ॥ ग्रामान्त्सजातयोयंतीप्संतःपरिजा
कृतान्त्स्वाहा ॥ एतान्हतैतान्वश्मीतेत्ययंब्रह्मणोदूतस्तानग्निःपर्यसरत् ॥

तानिंद्रस्तान्बृहस्पतिस्तानहंवेदब्राह्मणःप्रमृशतःकूटदंतान्विकेशान्लंब
स्तनान्स्वाहा ॥ नक्तंचारिणउरस्पेशान्छलहस्तान्कपालपान्त्स्वाहा ॥
माताजघन्यागच्छंतीग्रामेविखुरमिच्छंतीस्वाहा ॥ नक्तंचारिणीस्वसासं
धिनाप्रेक्ष्यतेकुलं ॥ यास्वपत्सुजागर्तियस्यैविजातायांमनःस्वाहा ॥ ता
सांत्वंकृष्णवर्त्मनेक्लोमान॑हृदयंयकृत् ॥ अग्नेक्षिणीनिर्दहस्वाहा ॥
यत्तेसुशीमेहृदयंदिविचंद्रमसिश्रितं ॥ तस्यामृतत्वस्यनोधेहिमाहंपौत्र
मघ॑रुदं ॥ वेदतेभूमिहृदयंदिविचंद्रमसिश्रितं ॥ तथामृतत्वस्येशा
नोमापौत्रमघ॑रुदं ॥ ४ ॥ मातेपुत्र॑रक्षोहि॑सीन्माधेनुरतिसारिणी ॥
प्रियाधनस्यभूयाएधमानास्वेवशे ॥ अयंकुमारोजरांधयतुसर्वमायुरेतु
तस्मैस्तनंप्रप्यायस्वायुःकीर्तिर्वर्चोयशोबलं ॥ नामयतिनरुदतियत्रव
यंवदामोयत्रवाभिमृशामसि ॥ आपोगृहेषुजाग्रतयथादेवेषुजाग्रथ ॥

एवमस्यैसुपुत्रायैजाग्रत ॥ येनपूषावृहस्पतेरग्नेरिंद्रस्यचायुपेवपत् ॥
तेनतेहंवपामि ॥ यथाज्योक्सुमनाअसत् ॥ ज्योक्चसूर्यंदृशे ॥ यत्रपू
षावृहस्पतिःसवितासोमोअग्निः ॥ तेभ्योनिधानंवहुधाव्यैच्छन्नंतराद्या
वापृथिवीअपःसुवः ॥ येतेशतंवरुणयेसहस्रंयज्ञियाःपाशावितताःपुरु
त्रा ॥ तेभ्योनइंद्रःसवितोतविष्णुर्विश्वेदेवामुंचंतुमरुतःस्वस्त्यास्वाहा ॥
आयुर्ददेवजरसंगृणानोघृतप्रतीकोघृतपृष्ठोअग्ने॥ घृतंपिवन्नमृतंचारुग
व्यंपितेवपुत्रंजरसेनयेमꣳस्वाहा ॥ आतिष्ठेममश्मानमश्मेवत्वꣳस्थिरो
भव॥ प्रमृणीहिदुरस्यून्त्सहस्वपृतनायतः ॥ याअकृंतन्नवयन्याअतन्व
तयाश्चदेवीरंतानभितोददंत॥ तास्त्वादेवीर्जरसासंव्ययन्त्वायुष्मानिदं
परिधत्स्ववासः॥ परिधत्तधत्तवाससैनꣳशतायुषंकृणुतदीर्घमायुः॥ वृह
स्पतिःप्रायच्छद्वासएतत्सोमायराज्ञेपरिदातवाउ ॥ जरांगच्छासिपरिध

त्स्ववासोभवाकृष्टीनामभिशस्तिपावा ॥ शतंचजीवशरदःसुवर्चारायश्च
पोषमुपसंव्ययस्व॥परीदंवासोधिधास्वस्तयेभूरापीणामभिशस्तिपावा ॥
शतंचजीवशरदःपुरूचीर्वसूनिचाय्योविभजासजीवन् ॥ ५ ॥ यादुरि
तापरिबाधमानाशर्मवरूथेपुनतीनआगात् ॥ प्राणापानाभ्यांबलमाव
हंतीस्वसादेवानाꣳसुभगामेखलेयं ॥ मित्रस्यचक्षुर्धरणंधरीयस्तेजोयश
स्विस्थविरꣳसमिद्धं ॥ अनाहनस्यंवसनंजरिष्णुपरीदंवाज्यजिनंधत्स्व ॥
अदितिस्तेकक्षांबध्नातु ॥ वेदस्यानुवक्तवैमेधायैश्रद्धायाअनूक्त्यानिरा
करणायब्रह्मणेब्रह्मवर्चसाय ॥ परीममिंद्रब्रह्मणेमहेश्रोत्रायदध्मस्यथै
नंजरिमाणयेज्योक्श्रोत्रेधिजागरत् ॥ आगंतासमगन्महिप्रसमृत्युंयुयो
तन ॥ अरिष्टाःसंचरेमहिस्वस्तिचरतादिहस्वस्त्यागृहेभ्यः ॥ ब्रह्मचर्य
मागामुपमानयस्वब्रह्मचारीभवानिदेवेनसवित्राप्रसूतः ॥ स्वस्तिदेवस

वितरहमनेनामुनोदचमशीय ॥ अग्नौपृथिव्यांप्रतितिष्ठवायावंतरिक्षे
सूर्येदिवियाꣳस्वस्तिमग्निर्वायुरादित्यश्चंद्रमाआपोनुसंचरंतिताꣳस्व
स्तिमनुसंचर ॥ अग्नयेसमिधमाहार्षबृहतेजातवेदसे ॥ यथात्वमग्नेस
मिधासमिध्यसएवंमांमेधयाप्रज्ञयाप्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनस
मेधयस्वाहा ॥ अग्निष्टआयुःप्रतरांकृणोत्यग्निष्टेपुष्टिंप्रतरांदधात्विद्रोमरु
द्भिरिहतेदधात्वादित्यस्तेवसुभिरादधातु॥ यस्यतेप्रथमवास्यꣳहरामस्तं
त्वाविश्वेअवंतुदेवाः ॥ तंत्वाभ्रातरःसुहृदोवर्धमानमनुजायतांबहवःसु
जातं॥ एषातेअग्नेसमित्तयावर्धस्वचाचप्यायस्व ॥ वर्धिषीमहिचवयमा
चप्यासिषीमहिस्वाहा ॥६॥ इमꣳस्तोममर्हतेजातवेदसेरथमिवसंमहे
मामनीषया॥ भद्राहिनःप्रमतिरस्यसꣳसद्यग्नेसख्येमारिषामावयंतवस्वा
हा ॥ क्षुरोनामासिस्वधितिस्तेपितानमस्तेअस्तुमामाहिꣳसीः॥ यत्क्षुरेण

मर्चयथासुपेशसावसर्वपसिकेशश्मश्रुवर्चयासुखंमानआयुःप्रमोषीः॥इद
महममुष्यासुष्यायणस्यपाप्मानमवगूहामि ॥ अन्नाद्यायव्यूहध्वंदीर्घायु
त्वायव्यूहध्वंब्रह्मवर्चसायव्यूहध्वंदीर्घायुरहमन्नादोब्रह्मवर्चसीभूयासं ॥
नमोग्रहायचाभिग्रहायचनमःशाकजंजभाभ्यांनमस्ताभ्योदेवताभ्योया
अभिग्राहणीः ॥ अप्सरासुचयोगंधोगंधर्वेषुचयद्यशः॥दैव्योयोमानुषोगं
धःसमाविशतादिह ॥ सोमस्यतनूरसितनुवंमेपाहिस्वामातनूराविश
शिवामातनूराविश ॥ आयुष्यंवर्चस्य ँरायस्पोषमौद्भिदं ॥ इद ँहिरण्य
मायुषेवर्चसेजैत्रायाविशतांमा ँस्वाहा ॥ उच्चैर्वाजिपृतनासाह ँसभासा
हंधनंजयं ॥ सर्वाःसमग्राऋचयोहिरण्येसिन्त्समाभृताःस्वाहा ॥ शुनम
ह ँहिरण्यस्यपितुरिवनामाग्रभीषं॥तंमाहिरण्यवर्चसंकरोतुपुरुषुप्रियंब
ह्मवर्चसिनंमाकरोतुस्वाहा ॥ प्रियंमाकुरुदेवेषुप्रियंमाब्रह्मणिकुरु ॥ प्रियं

विश्येपुशूद्रेपुप्रियंमाकुरुराजसुस्वाहा ॥ इयमोपधेत्रायमाणासहमानास
रस्वती ॥सामाहिरण्यवर्चसंकरोतुपुरुषुप्रियंब्रह्मवर्चसिनंमाकरोतुस्वाहा
॥७॥ विराजंचस्वराजंचाभिष्टिर्यांचनोगृहे ॥ लक्ष्मीराष्ट्रस्यायामुखेतयामा
स॰सृजामसि ॥ ऋतुभिष्ट्वार्तवैरायुपेवर्चसेसंवत्सरस्यधायसातेनसन्ननु
गृह्णासि ॥ इयमोपधेत्रायमाणासहमानासरस्वती ॥ सामाहिरण्यवर्चसं
करोतुपुरुषुप्रियंब्रह्मवर्चसिनंमाकरोत्वपाशोसि ॥ शुभिकेशोभमारोह
शोभयंतीमुखंमम ॥ मुखंचममशोभयभूया॰संचभगंकुरु ॥ यामाहरज्ञ
मदग्निःश्रद्धायैकामायास्यै ॥ इमांतांप्रतिमुंचेहंभगेनसहवर्चमयिपर्वत
पूरुषं ॥ यदांजनंत्रैककुदंजात॰हिमवतउपरि ॥ तेनवामांजेहंभगेन
सहवर्चसामयिपर्वतपूरुषं ॥ वेगवेजयास्मत्द्विषतस्करान्त्सरीसृपान्
छापदान्रक्षा॰सिपिशाचान्पौरुषेयाद्धयान्नोदंडरक्षविश्वस्माद्धयाद्रक्ष

सर्वतोजहितस्करानन्नमःसर्ववृक्षेषुजायसेत्वꣳसपत्नहा ॥ जहिशत्रुग
णान्त्सर्वान्त्संमतंमघवानिव ॥ योमेदंडःपरापतद्विहायसोधिभूम्यां ॥
इमंतंपुनरादेयमायुषेचबलायच ॥ विराजोदोहोसिमयिदोहःपद्यायै
विराज ॥ आत्मानमभिसृशति ॥ मयितेजइंद्रियंवीर्यमायुःकीर्तिर्वर्चो
यशोबलं ॥ आमागन्यशसासꣳसृजतेजसावर्चसापयसाच ॥ तंमाकु
रुप्रियंप्रजानामधिपतिंपशूनां ॥ यन्मधुनोमधव्यंपरममन्नाद्यꣳरूपं ॥
तेनाहंमधुनोमधव्येनपरमेणरूपेणपरमोमधव्योन्नादोभूयासं ॥ तेज
सेत्वाश्रियैयशसेबलायान्नाद्यायप्राश्नामि ॥ ८ ॥ सुमंगलीरियंवधूरि
माꣳसमेतपश्यत ॥ सौभाग्यमस्यैदत्वायाथास्तंविपरेतन ॥ अग्निरैतु
प्रथमोदेवतानाꣳसोस्यैप्रजांमुंचतुमृत्युपाशात् ॥ तदयꣳराजावरुणो
नुमन्यतांयथेयꣳस्त्रीपौत्रमघंनरोदात्स्वाहा ॥ इमामग्निस्त्रायतांगार्हप

त्यःप्रजामस्यैनयतुदीर्घमायुः ॥ अशून्योपस्थाजीवतामस्तुमातापौत्र
मानंदमभिप्रबुध्यतामिय९स्वाहा ॥ मातेगृहेनिशिघोषउत्थादन्यत्र
त्वद्रुदत्यःसंविशंतु ॥ मात्वंविकेश्युरआवधिष्ठाजीवपत्नीपतिलोकेविरा
जप्रजांपश्यंतीसुमनस्यमाना९स्वाहा ॥ द्यौस्तेपृष्ठ९रक्षतुवायुरूरूअ
श्विनौचस्तनंधयतस्तेपुत्रान्त्सवितामिरक्षतु ॥ आवाससःपरिधानाद्बृह
स्पतिर्विश्वेदेवाअभिरक्षंतुपश्चात्स्वाहा ॥ अप्रजस्तांपौत्रमृत्युंपाप्मानमु
तवाघं ॥ शीर्ष्णःस्रजमिवोन्मुच्यद्विषद्भ्यःप्रतिमुंचामिपाप९स्वाहा ॥
देवकृतंब्राह्मणंकल्पमानंतेनहन्मियोनिषदःपिशाचान् ॥ क्रव्यादोमृ
त्यूनधरान्पादयामिदीर्घमायुस्तवजीवंतुपुत्राःस्वाहा ॥ ९ ॥ सरस्वति
प्रेदमिवसुभगेवाजिनीवति ॥ तांत्वाविश्वस्यभूतस्यप्रजायामस्यग्रतः ॥
गृह्णामितेसुप्रजास्त्वायहस्तंमयापत्याजरदष्टिर्यथासत् ॥ भगोअर्यमा

सवितापुरंधिर्मह्यंत्वादुर्गार्हपत्यायदेवाः ॥ अघोरचक्षुरपतिघ्न्येधिशि
वापशुभ्यःसुमनाःसुवर्चाः ॥ जीवसूर्वीरसूःस्योनाशंनएधिद्विपदेशंच
तुष्पदे ॥ तान्नःपूषंछिवतमामेरयस्वयस्यांबीजंमनुष्यावपंति ॥ यान
ऊरूउशतीविस्रयातैयस्यामुशंतःप्रहरेमशेपं ॥ सोमःप्रथमोविविदेगं
धर्वोविविदउत्तरः ॥ तृतीयोअग्निष्टेपतिस्तुरीयोहंमनुष्यजाः ॥ सोमो
ददद्गंधर्वायगंधर्वोग्नयेददात् ॥ पशू ँश्चमह्यंपुत्रा ँश्चाग्निर्ददात्यथोत्वां ॥
असुहमस्मिसात्वंद्यौरहंपृथिवीत्व ँसामाहमृक्त्वंतावेहिसंभवावसहरे
तोदधावहैपु ँसेपुत्रायवेत्तवैरायस्पोषायसुप्रजास्त्वायसुवीर्यायाइमांत्व
मिंद्रमीढ्वःसुपुत्रा ँसुभगांकुरु ॥ दशास्यांपुत्रानाधेहिपतिमेकादशंकुरु ॥
इमांलाजानावपामिसमृद्धिकरणान्मम ॥ तुभ्यंचसंवननंतदग्निरनुमन्य
तामयं ॥ इयंनार्युपब्रूतेमौलाजानावपंतीदीर्घायुरस्तुमेपतिरेधंतांज्ञातयो

ममस्वाहा ॥ विश्वाउतत्वयावयंधाराउदन्याइव ॥ अतिगाहेमहिद्विषः
॥ १० ॥ सप्तर्षयःप्रथमांकृत्तिकानामरुंधतीं ॥ येध्रुवता ऽहनिन्युः ॥ षट्कृ
त्तिकामुख्ययोगंवहंतीयमस्माकंश्राजत्वष्टमिति ॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रु
वमसिध्रुवतस्थितं ॥ त्वंनक्षत्राणांमेथ्यसिसमापाहिपृतन्यतः ॥ नमोब्रह्म
णेध्रुवायाच्युतायास्तुनमोब्रह्मणःपुत्रायप्रजापतयेनमोब्रह्मणःपुत्रेभ्योदे
वेभ्यस्त्वयस्त्रि ऽशेभ्योनमोब्रह्मणःपुत्रपौत्रेभ्योंगिरोभ्योयस्त्वांध्रुवमच्युत
ऽसपुत्र ऽसपौत्रंब्रह्मवेदध्रुवाअस्मिन्पुत्राःपौत्राभवंतिप्रेप्यंतेवासिनोव
सनंकंबलानिक ऽस ऽहिरण्य ऽस्त्रियोराजानोन्नमभयमायुःकीर्तिर्वर्चोय
शोबलंब्रह्मवर्चसमन्नाद्यमित्येतानिमयिसर्वाणिध्रुवाण्यच्युतानिसंतु ॥
ध्रुवंत्वाब्रह्मवेदध्रुवोहमस्मिन्लोकेस्मि ऽश्वजनपदेभूयासमच्युतंत्वाब्रह्म
वेदमाहमस्माल्लोकादस्माच्चजनपदाच्चोषिद्विषन्मेभ्रातृव्योस्माल्लोकाद

स्माच्चजनपदाच्च्यवतामचेष्टंत्वाब्रह्मवेदमाहमस्माल्लोकादस्माच्चजनपदा
च्चेष्टिषिद्वषन्मेभ्रातृव्योस्माल्लोकादस्माच्चजनपदाच्चेष्टतामव्यथमानंत्वा
ब्रह्मवेदमाहमस्माल्लोकादस्माच्चजनपदाव्यथिषिद्विषन्मेभ्रातृव्योस्माल्लो
कादस्माच्चजनपदाद्व्यथतां ॥ नभ्यंत्वासर्वस्यवेदनभ्यमहमस्यजनप
दस्यभूयासंमध्यंत्वासर्वस्यवेदमध्यमहमस्यजनपदस्यभूयासंतंतिंत्वासर्व
स्यवेदतंतिरहमस्यजनपदस्यभूयासंमेथींत्वासर्वस्यवेदमेथ्यमहमस्यज
नपदस्यभूयासंनाभिंत्वासर्वस्यवेदनाभिरहमस्यजनपदस्यभूयासंयथा
नाभिःप्राणानांविषूवानेवमहंविषूवानेकशतंतंपाप्मानमृच्छतुयोस्मान्द्वे
ष्टियंचवयंद्विष्मोभूया᳕सिमामेकशतात्पुण्यान्यागच्छंतु ॥ ११ ॥ अग्ने
प्रायश्चित्तेत्वंप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैघोरा
तनूस्तामितोनाशयस्वाहा ॥ वायोप्रायश्चित्तेत्वंप्रायश्चित्तिरसिब्राह्मण

स्त्वानाथकामउपधावामियास्यैनिंदितातनूस्तामितोनाशयस्वाहा ॥ आ
दित्यप्रायश्चित्तेत्वंप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामिया
स्यैपतिघ्नीतनूस्तामितोनाशयस्वाहा ॥ अभित्वापंचशाखेनशिवेनाभि
द्विषावता ॥ सहस्रेणयशस्विनाहस्तेनाभिमृशामसिमुप्रजास्त्वायेति ॥
यस्मैत्वाकामकामायवय९सम्राड्यजामहे ॥ तमस्मभ्यंकामंदत्वाथेदंत्वं
घृतंपिवस्वाहा ॥ इहैवध्रुवांनिमिनोमिशालांक्षेमेतिष्ठतिघृतमुक्षमाणा ॥
तांत्वाशालेसुवीराःसर्ववीराअरिष्टवीराअनुसंचरेम ॥ इहैवध्रुवाप्रति
तिष्ठशालेअश्वावतीगोमतीसूनृतावती ॥ ऊर्जस्वतीपयसापिन्वमानो
च्छ्रयस्वमहतेसौभगाय ॥ आत्वाकुमारस्तरुणआवत्सोजगतासह ॥
आत्वाहिरण्मयःकुंभआदध्नःकलशैरयन्निव ॥ ऋतेनस्थूणावधिरोहव९
शोर्ध्वोविराजन्नपसेधशत्रून् ॥ अथास्मभ्य९सहवीरा९रयिंदाः ॥ मानः

सपत्नःशरणःस्योनादेवोदेवेभिर्विमतास्यग्रे ॥ तृणंवसानाःसुमनाअसि
त्वꣳशंनएधिद्विपदेशंचतुष्पदे ॥ १२ ॥ गृहामाबिभीतमावेपिढमूर्ज
विभ्रतएमसि ॥ ऊर्जबिभ्रद्वसुवनिःसुमेधागृहानेमिमनसामोदमानः ॥
येषामभ्येतिप्रवसन्नेतिसौमनसोबभुः ॥ गृहानुपह्वयामहेतेनोजानंतु
जानतः ॥ उपहूताइवगावउपहूताअजावयः ॥ अथोअन्नस्यकीलाल
उपहूतोगृहेषुनः ॥ उपहूताभूरिसखाःसखायःस्वादुसंमुदः ॥ अरिष्टाः
सर्वपूरुषागृहानःसंतुसर्वदा ॥ ऊर्जस्वंतःपयस्वंतइरावंतोहसामुदः ॥
अनश्याअतृष्यागृहामास्मद्बिभीतन ॥ क्षेमायवःशांत्यैप्रपद्येशिवꣳशग्म
शंयोःशंयोः ॥ गृहानहꣳसुमनसःप्रपद्येवीरघ्नोवीरतमःसुशेवान् ॥ इ
रावहंतःसुमनस्यमानास्तेष्वहꣳसुमनाःसंशामि ॥ १३ ॥ इतिहिरण्य
केशीयसूत्रभागःसमाप्तः ॥

अथयजुर्वेदमंत्रप्रारंभः ॥ सशिराजातवेदाः ॥ अक्षरैरब्रह्मसंमितं ॥
वेदानाꣳशिरउत्तमं ॥ जातवेदसेशिरसामाता ॥ स्वयंब्रह्मभूर्भुवःसुवरो
म् ॥ यज्जाग्रतोदूरमुदैतुदैवंतदुसुप्तस्यतथैवैति ॥ दूरंगमंज्योतिषांज्योतिरे
कंतन्मेमनःशिवसंकल्पमस्तु ॥ येनकर्माण्यपसोमनीषिणोयज्ञेकृण्वंतिविदथेषुधीराः ॥ यदपूर्वयक्षमंतःप्रजानांतन्मेमनःशिवसंकल्पमस्तु ॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिरंतरमृतंप्रजासु ॥ यस्मान्नऋतेकिंचनकर्मक्रियतेतन्मेमनःशिवसंकल्पमस्तु ॥ येनेदंभूतंभुवनंभविष्यत्परिगृहीतममृतेनसर्वं ॥ येनयज्ञस्तायतेसप्तहोतातन्मेमनःशिवसंकल्पमस्तु ॥ यस्मिन्नृचःसामयजूꣳषियस्मिन्प्रतिष्ठितारथनाभाविवाराः ॥ यस्मिꣳश्चित्तꣳसर्वमोतंप्रजानांतन्मेमनःशिवसंकल्पमस्तु ॥ सुषारथिरश्वानिवयं

मनुष्यान्नेनीयतेभीशुभिर्वाजिनइव ॥ हृत्प्रतिष्ठंयदजिरंयविष्ठंतन्मेमनः
शिवसंकल्पमस्तु ॥ इतियजुर्वेदमंत्राःसमाप्ताः ॥

अथऋग्वेदमंत्रप्रारंभः॥ येभ्योमातामधुमत्पिन्वतेपयःपीयूषंद्यौरदि
तिरद्रिबर्हाः ॥ उक्थशुष्मान्वृषभरान्स्वप्नसस्ताँआदित्याँअनुमदास्वस्त
ये ॥ नमोमह्द्भ्योनमोअर्भकेभ्योनमोयुवभ्योनमआशिनेभ्यः ॥ यजाम
देवान्यदिशक्वामाज्यायसःशंसमावृक्षिदेवाः ॥ असुनीतेपुनरस्मासु
चक्षुःपुनःप्राणमिहनोधेहिभोगं ॥ ज्योक्पश्येमसूर्यमुच्चरंतमनुमतेमृळ
यानःस्वस्ति ॥ अस्मेरुद्रामेहनापर्वतासोवृत्रहत्येभरहूतौसजोषाः ॥ यः
शंसतेस्तुवतेधायिपज्रइंद्रज्येष्ठाअस्माँअवंतुदेवाः ॥ तमीशानंजगतस्त
स्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं ॥ पूषानोयथावेदसामसद्वृधेरक्षि
तापायुरदब्धःस्वस्तये ॥ शरासःकुशरासोदर्भासःसैर्याउत ॥ मौंजाअह

ष्टावैरिणाःसर्वसाकंन्यलिप्सत ॥ इहैवस्तंमावियौष्टंविश्वमायुर्व्यश्नुतं ॥
क्रीळंतौपुत्रैर्नप्तृभिर्मोदमानौस्वेगृहे ॥ वसिष्ठासःपितृवद्वाचमक्रतदेवाँई
ळानाऋषिवत्स्वस्तये ॥ प्रीताईवज्ञातयःकाममेत्यास्मेदेवासोवंधूनुतावसु ॥ देवान्वसिष्ठोअमृतान्ववंदेयेविश्वाभुवनाभिप्रतस्थुः ॥ तेनोरासंतामुरुगायमद्ययूयंपातस्वस्तिभिःसदानः ॥ इदंपितृभ्योनमोअस्त्वद्येतिनमस्कारवतीमंततःशंसतितस्मादंततःपितृभ्योनमस्क्रियतैतदाहुर्व्याहावंपित्र्याःशंसेऽत्॥अन्याहावाँ३इति॥व्याहावमेवशंसेदसंस्थितंवैपितृयज्ञस्यसाध्वसंस्थितंवाएषपितृयज्ञंसंस्थापयतियोव्याहावंशंसतितस्माद्व्याहावमेवशंस्तव्यं ॥ १ ॥ उपह्वयेसुदुघांधेनुमेतांसुहस्तोगोधुगुतदोहदेनां ॥ श्रेष्ठंसवंसवितासाविषन्नोभीद्घोघर्मस्तदुषुप्रवोचं ॥ हिंकृण्वती वसुपत्नीवसूनांवत्समिच्छंतीमनसाभ्यागात् ॥ दुहामश्विभ्यांपयोअघ्ये

यंसावर्धतांमहतेसौभगाय ॥ इंद्रद्द्यामकोशाअभूवन्यज्ञायशिक्षगृण
तेसखिभ्यः ॥ दुर्मायवोदुरेवामर्त्यासोनिषंगिणोरिपवोहंत्वासः ॥ वाशी
मंतऋष्टिमंतोमनीषिणःसुधन्वानइषुमंतोनिषंगिणः ॥ स्वश्वास्थसुरथाः
पृश्निमातरःस्वायुधासऋतोयाथनाशुभं ॥ चतुष्कपर्दायुवतिःसुपेशाघृत
प्रतीकावयुनानिवस्ते ॥ तस्यांसुपर्णावृषणानिषेदतुर्यत्रदेवादधिरेभागधे
यं ॥ एकःसुपर्णःससमुद्रमाविवेशसइदंविश्वंभुवनंविचष्टे ॥ तंपाकेनमन
सापश्यमंतितस्तंमातारेळिहसउरेळिहमातरं ॥ सुपर्णविप्राःकवयोवचोभि
रेकंसंतंबहुधाकल्पयंति ॥ छंदांसिचदधतोअध्वरेषुग्रहान्त्सोमस्यमिम
तेद्वादश ॥ पितुंनुस्तोषंमहोधर्माणंतविषीं ॥ यस्यत्रितोव्योजसावृत्रंवि
पर्वमर्दयत् ॥ स्वादोपितोमधोपितोवयंत्वावृमहे ॥ अस्माकंमविताभ
व ॥ उपनःपितवाचरशिवःशिवाभिरूतिभिः ॥ मयोभुरद्विषेण्यःसखा

सुशेवोऽद्ययाः ॥ तवत्येपितोरसारजांस्यनुविष्ठिताः ॥ दिविवातइवश्रि
ताः ॥ तवत्येपितोददतस्तवस्वादिष्टतेपितो ॥ प्रस्वाह्मानोरसानांतुवि
ग्रीवाइवेरते ॥ त्वेपितोमहानौदिवानामनोहितं ॥ अकारिचारुकेतुनात
वाहिमवसावधीत् ॥ यददोपितोअजगन्विवस्वपर्वतानां ॥ अत्राचिन्नो
मधोपितोरभक्षायगम्याः ॥ यदुपामोषधीनांपरिशमारिशामहे ॥ वातापे
पीवइद्भव ॥ यत्तेसोमगवाशिरोयवाशिरोभजामहे ॥ वातापेपीवइद्भव ॥
करंभओषधेभवपीवोवृकउदारथिः ॥ वातापेपीवइद्भव ॥ तंत्वावयंपितो
वचोभिर्गावोनहव्यासुषूदिम ॥ देवेभ्यस्त्वासधमादमस्मभ्यंत्वासधमा
दे ॥ कयानश्चित्रआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥
कस्त्वासत्योमदानांमंहिष्ठोमत्सदंधसः ॥ दृळहाचिदारुजेवसु ॥ अभीषु
णःसखीनामविताजरितॄणां ॥ शतंभवास्यूतिभि ॥ २ ॥ द्रविणोदाद्र

विणसस्तुरस्यद्रविणोदाःसनेरस्यप्रयंसत् ॥ द्रविणोदावीरवतीमिषन्नोद्र
विणोदारासतेदीर्घमायुः ॥ सविताप्रश्चात्सवितापुरस्तात्सवितोत्तरा
त्तात्सविताधरात्तात् ॥ सवितानःसुवतुसर्वतातिंसवितानोरासतांदीर्घमा
युः ॥ उच्चादिविदक्षिणावंतोअस्थुर्येअश्वदाःसहतेसूर्येण ॥ हिरण्यदाअ
मृतत्वंभजंतेवासोदाःसोमप्रतिरंतआयुः ॥ उद्धातेवशकुनेसामगायसि
ब्रह्मपुत्रइवसवनेषुशंससि ॥ वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकु
नेभद्रमावद विश्वतोनःशकुनेपुण्यमावद ॥ याज्ययायजतिप्रत्तिर्वैयाज्या
पुण्यैवलक्ष्मीःपुण्यामेवतल्लक्ष्मींसंभावयतिपुण्यांलक्ष्मींसंस्कुरुते ॥ स्व
स्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिं ॥ बृहस्पतिंसर्वगणंस्व
स्तयेस्वस्तयआदित्यासोभवंतुनः ॥ आदित्यउदयनीयःपथ्ययैवेतःस्व
स्त्याप्रयंतिपथ्यांस्वस्तिमभ्युद्यंतिस्वस्त्येवेतःप्रयंतिस्वस्त्युद्यंतिस्वस्त्यु

द्यंति ॥ ऋध्यामस्तोममनुयामवाऽ ..ामत्रसरथहापयात ॥ यशानप्
कंमधुगोप्वंतराभूतांशौअश्विनोःकामंमप्राः ॥ सर्वामृद्धिमृध्नुयामितितं
वैतेजसैवपुरस्तात्पर्यभवच्छंदोभिर्मध्यतोक्षरैरुपरिष्टाद्वायव्यासर्वतोद्वा
दशाहंपरिभूयसर्वामृद्धिमाप्नोत्सर्वामृद्धिमृध्नोतियएवंवेद ॥ ३ ॥ श्रियं
जातःश्रियआनिरियायश्रियंवयोजरित्रभ्योदधाति ॥ श्रियंवसानाअमृ
तत्वमायन्भवंतिसत्यासंमिथामितद्यौ ॥ श्रियएवैनंतच्छ्रियामादधातिसं
ततमृचावषट्कृत्यैसंतत्यैसंधीयतेप्रजयापशुभिर्यएवंवेद ॥ शुक्रेभिरंगै
रजआततन्वान्कृतुंपुनानःकविभिःपवित्रैः ॥ शोचिर्वसानःपर्यायुरपांश्रि
योमिमीतेबृहतीरनूनाः ॥ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमी
वोभवानः ॥ यत्त्वेमहेप्रतितन्नोजुषस्वशंनोभवद्विपदेशंचतुष्पदे ॥ वास्तो
ष्पतेप्रतरणोनएधिगयस्फानोगोभिरश्वेभिरिंदो ॥ अजरासस्तेसख्येस्या

मपितेवपुत्रान्प्रतिनोजुषस्व ॥ वास्तोष्पतेशग्मयासंसदातेसक्षीमहिर
ण्वयागातुमत्या ॥ प्राहिक्षेमउतयोगेवरंनोयूयंपातस्वस्तिभिःसदानः ॥
अमीवहावास्तोष्पतेविश्वारूपाण्याविशन् ॥ सखासुशेवएधिनः ॥ ४ ॥
समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायंत्यनिविशमानाः ॥ इंद्रोयावज्रीवृ
षभोरराद्तााआपोदेवीरिहमामवंतु ॥ याआपोदिव्याउतवास्रवंतिखनि
त्रिमाउतवायाःस्वयंजाः ॥ समुद्रार्थायाःशुचयःपावकास्ताआपोदेवीरिह
मामवंतु ॥ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां ॥ मधु
श्रुतःशुचयोयाःपावकास्ताआपोदेवीरिहमामवंतु ॥ यासुराजावरुणोया
सुसोमोविश्वेदेवायासूर्जमदंति ॥ वैश्वानरोयास्वग्निःप्रविष्टस्ताआपोदे
वीरिहमामवंतु ॥ त्रायंतामिहदेवास्त्रायंतांमरुतांगणः ॥ त्रायंतांविश्वाभू
तानियथायमरपाअसत् ॥ आपइद्वाउभेषजीरापोअमीवचातनीः ॥ आ

पः सर्वस्यभेषजीस्तास्तेकृण्वंतुभेषजं ॥ हस्ताभ्यांदशशाखाभ्यांजिह्वावा
चःपुरोगवी ॥ अनामयित्नुभ्यांत्वाताभ्यांत्वोपरस्पृशामसि ॥ इमाआपः
शिवतमाइमाःसर्वस्यभेषजीः ॥ इमारुद्रायत्र्यंबकायत्र्यंबकेनावपामहे ॥ भृतोमृताः ॥
याभिरिंद्रमभ्यषिंचत्प्रजापतिःसोमंराजानंवरुणंयमंमनुं ॥ ताभिरद्भिर
भिषिंचामित्वासहंराज्ञांत्वमधिराजोभवेह ॥ महांतंत्वासहीनांसम्राजंच
र्षणीनां ॥ देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत् ॥ ६ ॥ उपास्से
गायतानरःपवमानायेंदवे ॥ अभिदेवाँइयक्षते ॥ अभित्येमधुनापयोथ
र्वाणोअशिश्रयुः ॥ देवंदेवायदेवयु ॥ सनःपवस्वशंगवेशंजनायशमर्वते
ते ॥ शंराजन्नोषधीभ्यः ॥ वज्रंवेनुस्तवसेकृणायदिविस्पृशे ॥ सोमा
यगाथमर्चत ॥ हस्तच्युतेभिरद्रिभिःसुतंसोमंपुनीतन ॥ मधावाधा
वतामधु ॥ प्रमंदिनेपितुमदर्चतावचोयःकृष्णगर्भानिरहन्नृजिश्वना ॥

अवस्यवोवृषणंवज्रदक्षिणंमरुत्वंतंसख्यायहवामहे ॥ सूयवसाद्भगवती
हिभूयाअथोवयंभगवंतःस्याम ॥ अद्धितृणंमह्येविश्वदानींपिबशुद्धमु
दकमाचरंती ॥ ६ ॥ कनिक्रदज्जनुषंप्रब्रुवाणइयर्तिवाचंमरितेवनावं ॥
सुमंगलश्चशकुनेभवासिमात्वाकाचिदभिभाविश्व्यावदत् ॥ मात्वा
श्येनउदधीन्मासुपर्णोमात्वाविददिषुमान्वीरोअस्ता ॥ पित्र्यामनुप्रदिशं
कनिक्रदत्सुमंगलोभद्रवादीवदेह ॥ अवक्रंददक्षिणतोगृहाणांसुमंगलोभ
द्रवादीशकुंते ॥ मानस्तेनईशतमाघशंसोबृहद्वदेमविदथेसुवीराः ॥ प्र
दक्षिणिदभिगृणंतिकारवोवयोवदंतऋतुथाशकुंतयः ॥ उभेवाचौवदति
सामगाइवगायत्रंचत्रैष्टुभंचानुराजति ॥ उद्गातेवशकुनेसामगायसिब्रह्म
पुत्रइवसवनेषुशंससि ॥ वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभ
द्रमावदविश्वतोनःशकुनेपुण्यमावद ॥ आवदंस्त्वंशकुनेभद्रमावदतूष्णी

मासीनःसुमतिंचिकिद्धिनः ॥ यदुत्पतन्वदसिकर्करिर्यथावृहद्भदेमविदथे
सुवीराः ॥ ७ ॥ शतमिन्नुशरदोअंतिदेवायत्रानश्चक्राजरसंतनूनां ॥ पुत्रा
सोयत्रपितरोभवंतिमानोमध्यारीरिषतायुर्गतोः ॥ अस्मिन्राष्ट्रेश्रियमावे
शयाम्यतोदेवीःप्रतिपश्याम्यापः ॥ दक्षिणंपादमवनेनिजेस्मिन्राष्ट्रइंद्रि
यंदधामि ॥ सव्यंपादमवनेनिजेस्मिन्राष्ट्रइंद्रियंवर्धयामि ॥ पूर्वमन्यम
परमन्यंपादावनेनिजे ॥ देवाराष्ट्रस्यगुप्त्यैअभयस्यावरुध्यै ॥ आपःपा
दावनेजनीर्द्विपंतंनिर्दहंतुमे ॥ अनृक्षराऋजवःसंतुपंथायेभिःसखायोयं
तिनोवरेयं ॥ समर्यमासंभगोनोनिनीयात्संजास्पत्यंसुयममस्तुदेवाः ॥
आनःप्रजांजनयतुप्रजापतिराजरसायसमनक्त्वर्यमा ॥ अदुर्मंगलीःप
तिलोकमाविशशंनोभवद्विपदेशंचतुष्पदे ॥ अघोरचक्षुरपतिघ्येधिशि
वापशुभ्यःसुमनाःसुवर्चाः ॥ वीरसूर्देवकामास्योनाशंनोभवद्विपदेशंचतु

ष्पदे ॥ इमांत्वमिंद्रमीढ्वःसुपुत्रांसुभगांकृणु ॥ दशास्यांपुत्रानाधेहिपतिं
मेकादशंकृधि ॥ सम्राज्ञीश्वशुरेभवसम्राज्ञीश्वश्र्वांभव ॥ ननांदरिसम्रा
ज्ञीभवसम्राज्ञीअधिदेवृषु ॥ समंजंतुविश्वेदेवाःसमापोहृदयानिनौ ॥ सं
मातरिश्वासंधातासमुदेष्ट्रिदधातुनौ ॥ ८ ॥ परित्वागिर्वणोगिरइमाभं
वंतुविश्वतः ॥ वृद्धायुमनुवृद्ध्योजुष्टाभवंतुजुष्टयः ॥ तान्वोमहोमरुत
एवयाम्नोविष्णोरेषस्यप्रभूथेहवामहे ॥ हिरण्यवर्णान्ककुहान्यतःस्रुचोब्र
ह्मण्यंतःशंस्यंराधईमहे ॥ दशावनिभ्योदशकक्षेभ्योदशयोक्रेभ्योदशयो
जनेभ्यः ॥ दशाभीशुभ्योअर्चताजरेभ्योदशधुरोदशयुक्तावहंत्यः ॥ तेअ
द्र्योदशयंत्रासआशवस्तेषामाधानंपर्यैतिहर्यतं ॥ तऊसुतस्यसोम्यस्यांधं
सोंशोःपीयूषंप्रथमस्यभेजिरे ॥ तेसोमादोहरीइंद्रस्यनिंसतेशुंदुहंतोअ
ध्वासतेगवि ॥ तेभिर्दुग्धंपपिवान्त्सोम्यंमध्विंद्रोवर्धतेप्रथतेवृषायते ॥

वृषावोअंशुर्नकिलारिषाथनेळावंतःसदमित्स्थनाशिताः ॥ रैवत्येवमहे
साचारवस्थनयस्यग्रावाणोअजुषध्वमध्वरं ॥ विश्वेत्तातेसवनेषुप्रवाच्या
याचकर्थमघवन्निंद्रसुन्वते ॥ पारावतंयत्पुरुसंभृतंवस्वपावृणोःशरभाय
ऋषिबंधवे ॥ नीललोहितंभवतिकृत्यासक्तिर्व्यज्यते ॥ एधंतेअस्याज्ञा
तयःपतिर्बधेषुबध्यते ॥ प्रेतिचेतिचेत्येतद्वैसर्वस्वस्त्ययनंयत्प्रेतिचेतिचे
तितद्योस्यप्रियःस्यात्तमेतेनानुमंत्रयेतप्रेतिचेतिचेतिस्वस्त्येवगच्छतिस्व
स्तिपुनरागच्छति ॥ संगोभिरांगिरसोनक्षमाणोभगइवेदर्यमणंनिना
य॥जनेमित्रोनदंपतीअनक्तिबृहस्पतेवाजयाशूँरिवाजौ ॥ ९ ॥ अक्षी
भ्यांतेनासिकाभ्यांकर्णाभ्यांछुबुकादधि ॥ यक्ष्मंशीर्षण्यंमस्तिष्काज्जिह्वा
यावि वृहामिते ॥ ग्रीवाभ्यस्तउष्णिहाभ्यःकीकसाभ्योअनूक्यात् ॥ य
क्ष्मंदोषण्य१मंसाभ्यांबाहुभ्यांविवृहामिते ॥ आंत्रेभ्यस्तेगुदाभ्योवनि

ष्ठोर्हृदयादधि ॥ यक्ष्मंमतस्नाभ्यांयक्नःप्लाशिभ्योविवृहामिते ॥ ऊरुभ्यां तेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां ॥ यक्ष्मंश्रोणिभ्यांभासदाद्भंससोविवृहामिते ॥ मेहनाद्वनंकरणाल्लोमभ्यस्तेनखेभ्यः ॥ यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ॥ अंगादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि ॥ यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ॥ भद्राअग्नेर्वध्र्यश्वस्यसंदृशोवामीप्रणीतिःसुरणाउपेतयः ॥ यदींसुमित्राविशोअग्रइंधतेघृतेनाहुतोजरतेदविद्युतत् ॥ स्वर्भानोरधयदिंद्रमायाअवोदिवोवर्तमानाअवाहन् ॥ गूळ्हंसूर्यतमसापव्रतेनतुरीयेणब्रह्मणाविन्ददत्रिः ॥ धामंतेविश्वंभुवनमधिश्रितमंतःसमुद्रेहृद्यं१तरायुषि ॥ अपामनीकेसमिथेयआभृतस्तमश्यामधुमंतंतऊर्मिं ॥ १० ॥ भद्रोभद्रयासचमानआगात्स्वसारंजारोअभ्येतिपश्चात् ॥ सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्नुशद्भिर्वर्णैरभिराममस्थात् ॥ जज्ञानंस

समातरोवेधामशासतश्रिये ॥ अयंध्रुवोरयीणांचिकेतयत् ॥ योजागार
तमृचःकामयंतेयोजागारतमुसामानियंति ॥ योजागारतमयंसोमआह
तवाहमस्मिसख्येन्योकाः ॥ अग्निर्जागारतमृचःकामयंतेग्निर्जागारतमु
सामानियंति ॥ अग्निर्जागारतमयंसोमआहतवाहमस्मिसख्येन्योकाः ॥
जागर्पित्वंभुवनेजातवेदोजागर्पियत्रयजतेहविष्मान् ॥ इदंहविःश्रद्धा
नोजुहोमितेनपासिगुह्यंनामगोनाँ ॥ अधस्यायोपणामहीप्रतीचीवशम
श्यं ॥ अधिरुक्माविर्नीयसे ॥ सत्यासत्येभिर्महतीमहद्भिर्देवीदेवेभिर्य
जतायजत्रैः ॥ रुजदृळहानिदृंहदुस्रियाणांप्रतिगावउपसैवावशंत ॥ प्रक्षो
दसाधायसासस्रएपासरस्वतीधरुणमायसीपूः ॥ प्रवावधानारथ्येवयाति
विश्वाअपोमहिनासिंधुरन्याः ॥ आतूनइंद्रक्षुमंतंचित्रंग्राभंसंगृभाय ॥
महाहस्तीदक्षिणेन ॥ वास्तोष्पतेध्रुवास्थूणांसत्रंसोम्यानाँ ॥ द्रप्सोभे

त्तापुरांशश्वतीनामिंद्रोमुनीनांसखा ॥ ११ ॥ देवानांनुवयंजानाप्रवो
चामविपन्यया ॥ उक्थेषुशस्यमानेषुयःपश्यादुत्तरेयुगे ॥ ब्रह्मणस्प
तिरेतासंकर्मारइवाधमत् ॥ देवानांपूर्व्ययुगेसतःसदजायत ॥ देवानां
युगेप्रथमेसतःसदजायत ॥ तदाशाअन्वजायंततदुत्तानपदस्परि ॥
भूर्जज्ञउत्तानपदोभुवआशाअजायंत ॥ अदितेर्दक्षोअजायतदक्षाद्वदि
तिःपरि ॥ अदितिर्ह्यजनिष्टदक्षयादुहितातव ॥ तांदेवाअन्वजायंतभ
द्राअमृतबंधवः ॥ यदेवाअदःसलिलेसुसंरब्धाअतिष्ठत ॥ अत्रावोनृत्य
तामिवतीव्रोरेणुरपायत ॥ यदेवायतयोयथाभुवनान्यपिन्वत ॥ अत्रा
समुद्रआगूळहमासूर्यमजभर्तन ॥ अष्टौपुत्रासोअदितेर्येजातास्तन्वस्प
रि ॥ देवाँउपप्रैत्सप्तभिःपरामार्ताडमास्यत् ॥ सप्तभिःपुत्रैरदितिरुपप्रै
त्पूर्व्ययुगं ॥ प्रजायैमृत्यवेत्वत्पुनर्मार्ताडमाभरत् ॥ त्वंनोअग्नआयुषुत्वं

देवेषुपूर्व्यवस्वएकइरज्यसि ॥ त्वामापः परिस्रुतः परियंतिस्वसेतवोनभं
तामन्यकेसमे ॥ मोपुणः परापरानिर्ऋतिर्दुर्हणावधीत् ॥ पदीष्टतृष्णया
सह ॥ यज्ञायज्ञावः समनातुतुर्वणिर्धियंधियंवोदेवयाउदधिध्वे ॥ आवो
र्वाचःसुविताय रोदस्योर्महेवंवृत्यामवसेसुवृक्तिभिः ॥ इतिऋग्वेदमंत्राःस
माप्ताः ॥ ॥ इतिहिरण्यकेशीयामंत्रसंहितासमाप्ता ॥

इदं पुस्तकं गोखलेइत्युपनामकेन लक्ष्मणात्मजमहादेवभट्टेनसंपाद्यदत्तं तदिद मुंबय्यां
श्री. पांडुरंग जावजी श्रेष्ठिभिः स्वीये "निर्णयसागरा"ख्यमुद्रणालये
मुद्रयित्वा प्रकाशितम्. शाकः १८५६. सन १९३४.

PUBLISHER -Pandurang Jawaji,
PRINTER -Ramchandra Yesu Shedge, } at the "Nirnaya-sagar" Press,
26-28, Kolbhat Lane, Bombay.

Vol. 83

इति हिरण्यकेशीयामंत्रसंहिता।

याज्ञिकोपयोगीमंत्रसंग्रहः।